॥ श्रीः ॥

श्री यदुशैलवासि

विद्याविशारद, संस्कृतसेवासक्त, कविकुलतिलक

बालधन्वि जग्गू वकुलभूषण महाकविविरचितम्

नाटकद्वयम्

संयुक्ता-निघ्नतापसञ्च

प्रकाशकः

जग्गू. आळ्वारैय्यङ्गार्यः

" महालक्ष्मीमन्दिरम् "

I Main Road, Palace Lower Orchards,

(Behind Cauvery Talkies)

Bangalore 560003

1982

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

श्री यदुशैलवासि

विद्याविशारद, संस्कृतसेवासक्त, कविकुलतिलक

बालधन्वि जग्गू वकुलभूषण महाकविविरचितम्

नाटकद्वयम्

संयुक्ता-निग्रतापसञ्च

प्रकाशकः

जग्गू आळ्वारैय्यङ्गार्यः

" महालक्ष्मीमन्दिरम् "

I Main Road, Palace Lower Orchards,

(Behind Cauvery Talkies)

Bangalore 560003

1982

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Books can be had of

JAGGU ALWAR IYENGAR
"MAHALAKSHMI MANDIR"
I Main Road, Palace Lower Orchards
(Behind Cauvery Talkies)
Bangalore-560003

All Rights Reserved by the Author

Price : 8-00

Printed at :
Prabha Printing House, Basavanagudi, Bangalore-560 004

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

शुद्धिपत्रिका

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
२	५	धर	घर
३	५	ज्जु	ज्ज
,,	५	ङ्क	ख्ख
,,	१२	च्छे	च्छ
७	२१	घ	ध
८	४	दे	वे
,,	११	ळ	व
,,	१६	ण्डेया	ण्डयो
९	५	रो	रे
,,	१३	ढ्य	ठ्य
१२	१३	ह्वैः	द्वै
१३	२	रखु	खु
,,	१८	इ	र
१४	१३	णौ	णौं
,,	१६	द्व	ट्ट
१७	४	तो	ता
,,	२१	नः	तः
२६	१६	त्रिस	त्रिसि
२९	२३	स्त	स्ता
३३	४	वै	वे
,,	१०	खु	ख
,,	१४	न्वेणे	न्वेषणे
३६	७	मी	भी
,,	११	ब	भ
३७	४	ढ्ये	ठ्ये

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पृष्ठे	पङ्क्तौ	अशुद्धं	शुद्धं
३७	६	स्त	त्स
,,	१३	ट्यं	ठ्यं
,,	१८	च्छ	च्छा
३८	१४	स्त्री	स्स्त्री
४०	६	मि	पि
५६	१२	न्न	न्ना

षष्टिग्रन्थविनिर्माता जग्गू वकुलभूषणः ।
सर्वत्र विजयी भूयात्पण्डितैरभिनन्दितः ॥

कस्यचित् वृद्धस्याशीः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जग्गूवकुलभूषणविरचितं सुवर्णान्योक्तिपञ्चकम्

मद्गौरवं ननु सुवर्ण ! तुलाघटायां
लोहेन तोलयति हन्त करोमि किं वा ।
इत्थं सदा मनसि मा कुरु ते गुरुत्वं
तेन प्रकाशमुपयाति जनौघमध्ये ॥ १ ॥

वह्नौ निपात्य तव वर्णपरीक्षणं किं
कार्यं भवत्वपि तथैव बिभेषि न त्वम् ।
वर्णोत्तमत्वमपि ते प्रकटीकरोषि
हे जातरूप ! तव सिद्धमिदं कुतो भीः ॥ २ ॥

घनताडनञ्च दहने निपातनं
सकलञ्च सह्यमभवत्सुवर्ण ! यत् ।
भगवत्किरीटपदनूपुरत्वम-
प्यधिगत्य बोधयसि तत्तपःफलम् ॥ ३ ॥

भवदाश्रयतस्सुवर्ण ! कान्तिं नवरत्नानि भजन्ति ते शरीरे ।
श्रममप्यविचार्य दातृभावे भवदौदार्यमहो कथं ब्रवीमि ॥ ४ ॥

तमःपूर्णगर्ते वसत्त्वामनच्छं
समुद्धृत्य वह्नौ निपात्याच्छकायं ।
विधायाङ्गनातुङ्गवक्षोजकुम्भे
परिक्रीडनासक्तमातेनिरे हि ! ॥ ५ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

FOREWORD

Sri Jaggu Alwar Iyengar, with the pen-name Vakulabhūṣaṇa, comes from a traditional family of Sanskrit scholar-poets; and his numerous original contributions to modern Sanskrit literature, poems, plays etc., have won encomiums of traditional pundits and literary scholars alike. Not only he enjoys the popularity of a *sahaja-kavi* among literary scholars, and is a recipient of several public honours, but he is also a representative of a fast-disappearing tradition in the South of pure secular literature in Sanskrit. He has distinguished himself as a master of chiselled, chaste and felicitous phrasing in Sanskrit which can infuse new life into old legends and at the same time handle new historical themes with consummate art, free from the decadent flaws of prolixity, bombast and longwindedness. The two short plays published now show the playwright at his best.

Saṁyuktā deals with the well known historical-romantic episode of Pṛthvīrāj the hero, and the heroine Saṁyuktā, daughter of the inimical king, Jayachand; how they loved and how the hero overcame, by his knight-errantry, all obstacles in the way of their marriage. It is a short play in five Acts where the action moves rapidly, the tone shifts from the heroic to the comic and the romantic, with a soft touch of the pathetic; and the style is throughout as pellucid as it is poetic, as moving as it is thrilling.

Nighna-tāpasaṁ is a playlet in just two Acts giving a very vivid picture of the most popular and interesting episode of Ṛṣyaśṛṅga, seduced by the court damsels of King Romapāda. The hero is a youth brought up in the forest by his father in such seclusion that he does not even know what sex means. He has never seen a woman in his life. The courtesans artfully fascinate him and lure him to go to the city with them, where he is offered the princess in marriage because of the rains he brought with him to the blighted land. There is rollicking humour here, handled very skilfully by the author. Both these plays show how tradition can be blended with modernity by a master-artist.

I am happy to recommend this significant addition to modern Sanskrit literature as deserving the attention of all Sanskrit-lovers.

Karnataka University,
Dharwad.
January 12, 1982

K. Krishnamoorthy
Prof. & Head of Dept. of Sanskrit
Karnataka University, Dharwad.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

श्रीः

॥ श्रीमते रामानुजाय नमः ॥

उपोद्घातः

कविः काव्यं सहृदया नटास्सामाजिकास्सुधीः ।
जयन्तु ये रसास्वादे सिद्धा मुग्धा विदग्धकाः ॥

तत्रभवान् बालधन्विकुलकलशजलनिधिसुधांशुः जग्गू वकुलभूषणः कविः विरचितानेकपौराणिकनाटकलोकः चारित्रकेण प्रतिज्ञाकौटिल्येन स्वप्रतिभां प्रदर्श्य अन्यदपि चारित्रकं वस्तु मार्गमाणः "संयुक्ता"मेव सुयुक्तामवगच्छन् नाटकरत्नमङ्कपञ्चकात्मकमरीरचत् ॥

"नाश्लीलं कीर्तयेत्" इति सामान्यशास्त्रं "

" इति नाटकलक्षणमप्याकलय्य, कविर्दुःखान्तमपि चरितं सुखान्तं न्यरूपयत् । जयचन्द्रः स्वाभाविकमपि शाठ्यं समुत्सृज्य वैतसीं वृत्तिमाश्रितवानिति च । जयचन्द्रेणाश्वमेधार्थं वाजिविसर्जनं, कारागारबद्धपृथ्वीराज विदूषकत्रिसर्जनप्रत्युपकृतिधिया पृथ्वीराजेन बद्धस्य यज्ञीयाश्वस्य विमुक्तिः, अश्वमेधसमनन्तरमेव स्वयंवरसमारंभः इत्यादिकञ्च कविना कल्पितम् । जयचन्द्रसभास्थानापवरके पृथ्वीराजप्रतिकृतिकल्पनं च महीशूरमहाराजराजगृहस्थितराजास्थानगतनाल्वडिकृष्णभूपप्रतिकृतिं प्रत्याभिज्ञापयति । मध्यन्दिन, रथसंचलन, पर्णशाला, चम्पकाराम, कन्याकुब्जवैभव, विपणिवीधिगतषण्डजन, ब्राह्मण क्षत्रसंघ, स्वयंवरमण्डपादिवर्णनानि प्रकृतिसहजान्यपि समावर्जयन्ति सहृदयहृदयान्तराणि ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अयञ्च कविः सरसकवितया प्रकृतिसहजस्वभावोक्त्या "रवियद्यन्न-पश्येत्तु कविस्तत्तत्प्रपश्यति" इति गाधानुगुणकल्पनाचातुरीविलासेन च रसिकजनमनांसि समावर्जयन् कविकुलफालतलेषु तिलकायत इति न तिरोहितमेतत्समेषाम्।

तापसो हि ऋष्यशृङ्गः स्वपितुः गणिकानां महाराजस्य शान्तायाश्च सर्वथैवाधीन इति "निम्नतापसम्" इति नामास्य समुचितमेव, यतः स्वपितृकान्तारादन्यदजानानो हि मुग्धस्वभावो व्यवहारानभिज्ञस्स ऋषिपुत्रः। बालवन्नैसर्गिकेण तद्व्याहारेणान्तमार्जवमाविष्कृतम्। तदिदमुभयमपि नाटकं सहृदयहृदयपारणपारीणं भूयादित्याशास्महे।

सहृदयवशंवदः

"महालक्ष्मीमन्दिरम्"
I Main Road, Palace Lower Orchards
Behind Cauvery Talkies
Bangalore-560003.

बालधन्वि जग्गू सुदर्शनाचार्यः
साहित्य वेदान्त विद्वान्
विश्रान्त विशिष्टाद्वैतवेदान्त प्राध्यापकः
बेंगलूरु २२-१-८२.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

॥ शुभमस्तु ॥

संयुक्ता

प्रथमोऽङ्कः

निजानुरक्तामपहृत्य रुक्मिणीं
विजित्य शत्रून्समरेऽभियायिनः ।
जग्राह यस्तत्करपद्ममादरा-
त्स पातु युष्मान्पुरुषः पुरातनः ॥ १ ॥

(ततः प्रविशति नान्द्यन्ते सूत्रधारः)

सूत्र—(सानन्दं परिक्रम्य) एवमार्यमिश्रान्विज्ञापयामि—

नानानाटकनिर्माता यः कोविदमुदावहः ।
स एवास्यापि कर्ता हि जग्गू वकुलभूषणः ॥ २ ॥

(ससम्भ्रमं प्रविश्य)

नटी—(सभ्रूभङ्गं) अळमळं णेण, (अलमलमनेन)

सूत्र—(सोद्वेगं) अये, किन्नु खल्वेवं ।

नटी—तस्य कइणो वि णहि कज्जंदरं, तुह वि तहा (तस्य कवेरपि न हि कार्यान्तरं, तवापि तथा)

सूत्र—(सानुतापं) प्रिये, त्वमप्यरसिकेवान्यादृशी संवृत्तासि ।

नटी—आम, किदाणेअणाडअस्स तस्स कइणो वि णहि किंचि फळं, तुह वि, तहा एव्व (आम, कृतानेकनाटकस्य तस्य कवेरपि न हि किञ्चित्फलं, तवापि तथैव)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सूत्र—(सस्मितं) प्रिये, भवत्या कीदृशं फलमपेक्ष्यते ?

नटी—अत्थकरी खु विज्जा। (अर्थकरी खलु विद्या)

सूत्र—हुं, मुग्धासि किं तेन नश्वरेण ?

नटी—किं तं विणा घरकज्जं प्पचळइ। (किं तद्विना गृहकार्यं प्रचलति)

सूत्र—ननु, मन्दप्रज्ञासि, आशापाशनिगडितासि, अदृष्टायत्तं खलु धनं, मेरुशिखरमारूढस्यापि तावदेव धनं यावल्लभ्यं, कवेः पुनः स्वभाव ईदृश एव, जगति विरलाः खलु सहृदयाः, पश्य तावत्—

विकसति कुसुमं स्वयं वनान्ते
परिमलभाङ्भिरपेक्षमेव भोग्यम्।
अनुभवरसिकाः पतन्ति भृङ्गाः
कुतुकवशाद्धि न तत्र जन्तवोऽन्ये ॥ ३ ॥

(नेपथ्ये) हन्त, भोः—

नैव स्वयं नयविधौ मतिमान्द्विजोऽयं
नाप्यस्मदुक्तिषु मनो निदधाति मानी।
राज्यावनाय कतिचिद्दिवसान्नियुक्तो
राज्ञा विमुह्यति तरां जटिले तु कार्ये ॥ ४ ॥

सूत्र—(आकर्ण्य) हन्त, भोः एवं किल मूढप्रायं जगत्।

नटी—किं एदं ? (किमेतत्)

सूत्र—उक्तं हि, मूढप्रायं जगदिति।

नटी—हं वि ळोअगदा खु, ता ण बुद्धो अत्थो (अहमपि लोकगता खलु, तस्मान्न बुद्धोऽर्थः)

सूत्र—(सस्मितं) पृथ्वीराजस्य सचिवो नैध्रपनामा विप्रो विप्रतीसारेण व्याहरति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नटी—अणुदावस्स किं काळणं। (अनुतापस्य किं कारणं)

सूत्र—दिग्विजयाय प्रस्थितेन राज्ञा राज्यावनाय निमित्तमात्रं नियुक्तं नर्मसचिवं वसन्तकमुद्दिश्य पश्चात्तापः।

नटी—जुज्जुइ (सस्मितं) णम्मामच्चेण कहं रज्जरङ्कणं करीअदि। (युज्यते, नर्मामात्येन कथं राज्यरक्षणं क्रियते)

सूत्र—अत एवोक्तं किल, मूढप्रायं जगदिति, एहि गच्छावः।

(निष्क्रान्तौ)

(स्थापना)

(ततः प्रविशति नैध्रपः)

नैध्रपः—(नैव स्वयमिति पूर्वोक्तमेव पठित्वा) हन्त, नीत्या क्व राज्यरक्षणं क्वच स्वेच्छया परिहासवचनं, "सर्वं पश्यति सचिवोयं निमित्तमात्रं भवतु भवान्युवराजः यावद्विजयी प्रतिनिवर्तिष्ये, इति राज्ञा तावदाज्ञप्तस्य ब्रह्मबन्धोरस्य तावदसह्या किल स्वेच्छाप्रवृत्तिः कष्टं तदनुवर्तनं, (विचिन्त्य) भवतु, तावद्विराममभिलषामि यावद्राज्ञः प्रत्यागमनं, (इति परिक्रम्य सस्मितं)—

अक्रमबद्धोष्णीषः स्फुटिततनुत्रस्फुटीभवत्तुन्दः।
विप्रोयं प्रकटयति स्वालङ्कारेण नर्मसचिवत्वम् ॥ ५ ॥

(ततः प्रविशति सपरिच्छेदो यथानिर्दिष्टो वसन्तकः)

वसन्तकः—कहिं अमच्चो। (कुत्रामात्यः)

कञ्चुकी—इदानीं संस्कृतभाषया खल्वार्येण, हन्त, विस्मृतं, युवराजेन व्यवहर्तव्यं।

वसन्तकः—(नासाग्रनिहिताङ्गुलिः स्मृतिमभिनीय) सत्यं, क्वामात्यः? (इति सगम्भीरं परिक्रामति)

(उपसृत्य) **नैध्रपः**—अयमहमस्मि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसन्तकः—(सस्मितं) किमागतोसि, साधु, अमात्यवर्य, सभां प्रतिमार्गमादर्शय।

कञ्चुकी—इत इतो युवराजः, (इति मार्गं दर्शयति)

वसन्तकः—(सभ्रूभङ्गं) किं भवानमात्यः ?

(कञ्चुकी सभयं स्तोकमपसरति)

नैध्रपः—नहीदममात्यविहितं कर्म।

वसन्तकः—मयेदानीं युवराजेन विधीयते।

नैध्रपः—(सनिर्वेदं) इत इतो युवराजः, सभामण्डपोयं।

वसन्तकः—ममाप्यस्त्यक्षि।

नैध्रपः—प्रभुत्वशंसिनीयमुक्तिः।

वसन्तकः—(साट्टहासं) कथं, प्रभुत्वशंसिनी, तर्हि पुनरपि कथय, (सगर्वं) अयं कः ?

नैध्रपः—सभामण्डपः, प्रविशतु युवराजः।

वसन्तकः—(परिक्रम्य) इदम् ?

नैध्रपः—भद्रासनं।

वसन्तकः—उपविशतु वयस्यः, हन्त, विस्मृतं, अहमेवोपविशामि। (उपविशति)

नैध्रपः—अनवसितोयं विवादः, अपि नाम प्रचलतु ?

वसन्तकः—(स्वशिरः परामृशन्) किन्नु खलु, आसनपरिग्रहसमनन्तरमेव विवादः।

नैध्रपः—ह्यः किल यश्चार्धप्रचलितः।

वसन्तकः—गजनिगीर्णकपित्थमिव ममेदानीमन्तश्शून्यं शिरः, तन्मास्तु विवादविचारः प्रवर्ततां सङ्गीतकं।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नैध्रपः—यथादिशति। (इति पत्रमर्पयति)

वसन्तकः—(विलोक्य) बिडालस्येव ममाप्यक्षि, अत एव, रात्रावन्धकारे ग्रन्थावलोकनं, तदद्य त्वयैव पठ्यतां (इति पत्रं निर्यातयति)

नैध्रपः—नकिमप्यन्यत्, विरामस्तावदपेक्ष्यते, यावद्राज्ञः प्रत्यागमनं।

वसन्तकः—तर्हि, न तावद्वेतनमपि।

नैध्रपः—अस्तु नाम। (निष्क्रान्तः)

वसन्तकः—हुं, गच्छतु नाम, न किं प्रचलति तेन विना राज्यकार्यं, वसन्तकोस्म्यहं।

प्रविश्य द्वारपालः—दुवारे चिट्ठइ (द्वारेतिष्ठति)

वसन्तकः—किममात्यः?

द्वारपालः—ण हि जुवराअं दट्ठुकामो कोवि। (नहि युवराजं द्रष्टुकामः कोपि)

वसन्तकः—कोपि वा, मया शङ्कितं पुनरपि प्रत्यागमनममात्यस्य सत्वरं प्रवेशय।

द्वारपालः—तहा (तथा) (निष्क्रान्तः)

(प्रविश्य) **श्रेष्ठी**—(साञ्जलिबन्धं) स्वामिन् सिंहपालो नाम महावणिक् कालवशं गतः।

वसन्तकः—(स्वगतं) हन्त भोः, किमिदमापतितं, (प्रकाशं) न सन्निहितो राजा तं मोचयितुं।

श्रेष्ठी—मृतः कथं मोच्यते?

वसन्तकः—किन्नु खलु मृतः किं, महावणिगपि मृतः, हन्त, शोचनीयस्सः, (इति रुदन्) प्रवर्ततां सङ्गीतकं (कुशीलवैर्गीयते)

श्रेष्ठी—(साञ्जलिबन्धं) अस्ति निवेदनीयं।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसन्तकः—तर्हि मास्तु सङ्गीतकं, निवेदय तावत्, किं निमन्त्रयितुं व्यापृतोसि ?

श्रेष्ठी—हन्त, भोः ! (शिरसि हस्तमादधाति)

वसन्तकः—किं तवापि शिरोवेदना ?

श्रेष्ठी—नहि, नहि ।

वसन्तकः—किं तर्हि ?

श्रेष्ठी—स त्वनपत्यः ।

वसन्तकः—हन्त, स त्वनपत्यः, सापत्या खलु तस्य भार्या । (सर्वे-हसन्ति)

श्रेष्ठी—तत्कथमिव ?

वसन्तकः—तत्कथमिवेति प्रश्नः, (विचिन्त्य) हन्त, विस्मृतं साप्यनपत्यैव ततः ।

श्रेष्ठी—तत्स्यालः तद्धनापेक्षी ।

वसन्तकः—(परितो विलोक्य) क्व सचिवः हन्त, सोपि गतः किमद्य कर्तव्यं, हुं, भवतु, भो श्रेष्ठिन् केन समार्जितं तद्धनम् ?

श्रेष्ठी—सिंहपालेन ।

वसन्तकः—तर्हि कात्र विचिकित्सा, दीयतां सिंहपालाय ।

श्रेष्ठी—हन्त, तत्कथं दीयते मृताय ?

वसन्तकः—सत्यं, मृताय दातुं न शक्यते, तर्हि, अस्मिन्नगरे तत्सदृशनामधेयः न कोप्यस्ति ?

श्रेष्ठी—तदपि न युक्तं किल ।

वसन्तकः—(सभ्रूभङ्गं) किन्नु खल्विदं, युवराजवचनस्यापि प्रतीपोत्तरं । (सक्रोधं) भो श्रेष्ठिन् गृहविवादपरिहाराय नास्ति युवराजः । (नेपथ्ये) विजयतां महाराजः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसन्तकः—दिष्ट्या संप्राप्त इव वयस्यः, अलमनेन राज्यभारेण (इत्युत्तिष्ठति)

श्रेष्ठी—कथमिदानीं ?

वसन्तकः—(सस्मितं) अस्ति भवान्, अस्ति महाराजः।

श्रेष्ठी—अप्याज्ञा।

वसन्तकः—यथेच्छं तिष्ठ, यथेच्छं गच्छ।

श्रेष्ठी—(सनिर्वेदं) निरर्थको मत्प्रयासः (निष्क्रान्तः)

वसन्तकः—(परिक्रम्य नेपथ्याभिमुखमवलोक्य) इत एवायाति महाराजः। (विचिन्त्य) भवतु, (इति शिरसि हस्तयुगलमाधाय मर्कटवदुपविशति)

(ततः प्रविशति सचिन्तो राजा)

राजा—(दीर्घं निश्वस्य)—

दिग्विजयात्संप्राप्ताः रत्नविशेषा गुणैकबहुमूल्याः।
एकं रत्नममूल्यं गुणभूयिष्ठं च्युतं हि करतो मे ॥ ६ ॥

(ध्यानमन्दं परिक्रम्य पदस्खलनमभिनीयं) किन्नु खल्विदं ?

वसन्तकः—(सगद्गदं) वअस्सो वि रोइइ, हं वि रोइमि। (वयस्योपि रोदति अहमपि रोदिमि)

राजा—कथं, वसन्तकः, (सस्मितं) युवराजः ?

वसन्तकः—ण हि वसंतओ, जुवराओ वि णहि, मंदभग्गो। (नहि वसन्तकः युवराजोपि नहि मन्दभाग्यः)

राजा—किन्नु खलु मर्कट इव निषण्णोसि ?

वसन्तकः—तस्स घण्णत्तणं मंदभग्गस्स मह कहिं। (तस्य धन्यत्वं मन्द-भाग्यस्य मम कुत्र)

राजा—किमिदं, निर्विण्ण इव ?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसन्तकः—आम, सो उण जहच्चं रुक्खादो रुक्खं आहिंडइ। (आम, स पुनर्यथेच्छं वृक्षाद्वृक्षमाहिण्डति)

राजा—सखे, निदेदय तावत्, किं तत्।

वसन्तकः—महमत्थअम्मि रज्जभरं णिक्खिविअ वअस्सो संतुट्ठो पळिब्भमइ, हं उण रज्जभरेण एव्वं संउत्तोह्मि, (मम मस्तके राज्यभारं निक्षिप्य वयस्यस्सन्तुष्टः परिभ्रमति अहं पुनः राज्यभारेणैवं संवृत्तोस्मि)

राजा—(सस्मितं) किमियदेव, उत्तिष्ठ, कर्तव्यमस्ति, (बाहुं गृहीत्वा स्थापयति)

वसन्तकः—किं करणिज्जं दाणिं मए। (किं करणीयमिदानीं मया)

राजा—सुमहद्वर्तते।

वसन्तकः—किं मह एळ तुए रज्जाहिसेओ करीअदि? (किं ममैव त्वया राज्याभिषेकः क्रियते?)

राजा—(सस्मितं) आम, महत्कार्यनिर्वहणे तावदभिषिक्तोसि।

वसन्तकः—ता अळं णेण सहित्तणेण हं उण जहिं कहिं वि आहिंडिअ उअळभळणं करिस्सं (इति गन्तुमुद्युङ्क्ते) (तर्हि, अलमनेन सखित्वेन अहं पुनर्यत्र कुत्राप्याहिण्डेयादरभरणं करिष्यामि)

राजा—वयस्य, अलं भिया, वक्तव्यमस्ति। (बाहुं गृह्णाति)

वसन्तकः—(शिरसि हस्तमाधाय) हंहो, मत्थए किमण्णं णिवडिइस्सइ, णजाणामि, भणादु वअस्सो। (हंहो, मस्तके किमन्यन्निपतिष्यति, न जाने, भणतु वयस्यः)

राजा—श्रृणोतु वयस्यः

संसारपाथोनिधिसारभूतं
लावण्यपण्यं चिरपुण्यलभ्यम्।
तारल्ययोग्यं सगुणं सुवृत्तं
मुक्ताफलं दृष्टमहो न लब्धम् ॥ ७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसन्तकः—कहिं दिट्ठं (कुत्र दृष्टं)

राजा—कन्याकुब्जे

वसन्तकः—(सावेगं) हंहो, किं मए तत्थ गदुअ अण्णेसिदव्वं, णाहं पारोमि, मह कंठम्मि वट्टइ खु तं एव्व तुह देमि (हंहो किं मया तत्र गत्वाऽन्वेषितव्यं, नाहं पारयामि मम कण्ठे वर्तते खलु, तदेव तुभ्यं ददामि)

राजा—(विहस्य) न खल्वन्वेषणसाध्यं तत् रत्नहारिणोऽपि मे दुर्लभं किल,

वसन्तकः—ता किंकरणिज्जं, (तर्हि, किं करणीयं)

राजा—योगबलेन लभ्यं, शृणु तावत्—

मच्छौर्यमात्सर्यविवृद्धवैरो-
प्यधीनकल्पो जयचन्द्रनामा।
यश्शाढ्यदृप्तः प्रियबाह्यवृत्तिः
मुक्ताफलं तत्तदधीनमास्ते ॥ ८ ॥

वसन्तकः—(नासातले तर्जनीमाधाय सभ्रूभङ्गं) किण्णु खु, तुह वअणस्स णप्फुरइ अत्थो, (किन्नु खलु, तव वचनस्य न स्फुरत्यर्थः)

राजा—हुं, उत्तानहृदयोसि, सुन्दरीमौक्तिकमभिहितं।

वसत्तकः—कहं सुंदळीमोत्तिअं, मए वि तं एव्व तक्किदं, होदु ताए णाम हेअं, (कथं? सुन्दरीमौक्तिकं, मयापि तदेवं तर्कितं, भवतु तस्या नामधेयं)

राजा—संयुक्ता।

वसन्तकः—किं तुए? (किं त्वया)

राजा—मूर्ख, तस्या नामैव संयुक्तेति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसन्तकः—ता सच्चं तुए संजुत्ता हविस्सइ, (तर्हि सत्यं त्वया संयुक्ता भविष्यति)

राजा—तत्रैव विचिकित्सा।

वसन्तकः—अळं संसएण, वट्टामि खु हं (अलं संशयेन वर्ते खल्वहं)

राजा—न तावद्भवतापि सुलभसाध्यं।

वसन्तकः—किं मह वि? (किं ममापि)

राजा—आम।

वसन्तकः—ता किं करणिज्जं, (तर्हि किं करणीयं)

राजा—कर्णे (एवमिव)

वसन्तकः—जुज्जइ (युज्यते)

राजा—प्रबुद्धेन भवितव्यं।

वसन्तकः—वसंतओ खु हं (वसन्तकः खल्वहं)

(नेपथ्ये)

विजयी भव राजाधिराज, सन्निहिता माध्यन्दिनस्नानवेला सम्प्रति हि—

मरालास्तापार्ता नलिनविवरे स्वापनिरताः
मयूराः क्लान्ता मृण्मयशिखिनिभा यष्टिशिखरे।
कपोताः कान्ताभिर्वलभिशरणास्स्वानसुभगाः
समन्तादर्यम्णि प्रविकिरति तीक्ष्णान्निजकरान् ॥ ९ ॥

राजा—अपि गच्छामः माध्यन्दिननियमाय।

वसन्तकः—(स्वशिरः परामृशन्) वअस्स, बुहुक्खाए विसुमरिदं तं देसणामहेअं (वयस्य, बुभुक्षया विस्मृतं तद्देशनामधेयं)

राजा—कन्याकुब्जमिति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसन्तकः—चिट्ठ दाव हिअअगदं करोमि। कण्णा खुज्जं, कण्णा खुज्जं, किं करोमि, बुहुक्खा बाहेइ, (सजृम्भं) खुज्जा कण्णा, खुज्जा कण्णा (तिष्ठ तावत्, हृदयगतं करोमि, कन्याकुब्जं, कन्याकुब्जं। किं करोमि बुभुक्षा बाधते, कुब्जा कन्या, कुब्जा कन्या)

राजा—(सस्मितं) किन्नु खलु, विपरीतं पठ्यते, कन्याकुब्जमिति

वसन्तकः—किं कण्णाकुज्जं त्ति। दाणिं सुक्खा जादा जीहा। अंणदरं कंठगदं करिस्सं, एहि दाव, (किं कन्याकुब्जमिति, इदानीं शुष्का जाता जिह्वा, अनन्तरं कण्ठगतं करिष्यामि, एहि तावत्)

(निष्क्रान्तौ)

॥ इति प्रथमोऽङ्कः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

द्वितीयोऽङ्कः

(ततः प्रविशति वसन्तकः)

वसन्तकः—(संस्कृतमाश्रित्य) इह तावत्कन्याकुब्जे प्रासादचारिणां सर्वेषामपि विस्रम्भभाजनमस्मि, अथवा ममायं वेषः कस्य वा न विश्वासं जनयति—

प्ररूढदीर्घायतकूर्चजालः
काषायवासास्सितभस्मपुण्ड्रः।
कक्षस्थतालच्छदपुस्तकाढ्यः
रुद्राक्षमालाञ्चितकन्धरोऽस्मि ॥ १ ॥

अहं तावच्छकुनशास्त्रबलेन दृष्टं दृष्टमिव ब्रवीमि, अद्य तु संयुक्तायाष्षोडशवार्षिकमहोत्सवः प्रचलितः, हन्त, किं ब्रवीमि महोत्सववैभवं (स्वोदरं परामृशन्)—

अपूपपूरीपृथुलड्डुकाद्यैः
भक्ष्यैस्सस्रूपैर्घृततेमनान्नैः।
सुसंस्कृतैर्मे पृथुतुन्दभाण्डः
संपूरितो गन्धविलेपितश्च ॥ २ ॥

भवतु इहतावत्काञ्चनप्रासादे विविक्ते दन्तस्तम्भोपाश्रयो विश्रान्तिमुपलप्स्ये (इत्युपविश्योद्गमनीयेन स्वशीर्षमवगुठ्य स्वपिति)

(ततः प्रविशत्याभरणपेटिकापाणिः काञ्चनमाला)

काञ्चनमाला—संजुत्ताए णेवत्थं करणिज्जं। ता तुरिअं गच्छामि (संयुक्ताया नेपथ्यं करणीयं तत्वरितं गच्छामि) (परिक्रामति)

वसन्तकः—इह तु न कोप्यद्यापि मां पृथ्वीराजपक्ष्यं जानाति। मत्पक्ष्यं हि दैवं (इत्युत्स्वप्नायते)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

काञ्चनमाला—(सावेगमवलोक्य) किण्णु खु अह्माणं सउणवावदूओ विरूपङ्खो एव्वं भणादि (किन्नु खलु अस्माकं शकुनवावदूको विरूपाक्ष एवं भणति)

वसन्तकः—नर्मसचिवं वसन्तकं मां विरूपाक्षमेव जानाति।

काञ्चनमाला—कहं णम्मसचिवो एसो। होदु किंचिक्कीळामि (इति तस्य कूर्चाग्रं सूत्रेण स्तंभे बध्वा स्तम्भान्तर्हिता विस्वरमुच्चैः कूजति) (कथं नर्मसचिव एषः भवतु किञ्चित्क्रीडामि)

वसन्तकः—(बुध्वा सोद्वेगं) हन्त पिशाचः पिशाचः (त्वरितमुत्था तुमुद्युङ्क्ते। कूर्चस्तमवष्टभ्य निरुणद्धि) (काञ्चनमालास्मयते)

वसन्तकः—किन्नु खल्विदं। मामप्यवष्टभ्य निरुणद्धि (साक्षररिंखणं) हा हतोस्मि, पिशाचो मां बाधते। न कोप्यत्र किं करोमि (रोदिति)

काञ्चनमाला—(सत्वरं नीलचेलावगुंठितसर्वावयवा सताण्डवं सविस्वरं चोपसृत्य) चिट्ठळे चिट्ठ (तिष्ठ रे तिष्ठ)

वसन्तकः—(धावितुं कृतयत्नश्चुबुकबाधां निरूप्य साञ्जलिबन्धं) तात त्वं तावत्पुमान् उत योषित्?

काञ्चनमाला—कहं जाणादि भवं (कथं जानाति भवान्)

वसन्तकः—(स्वशीर्षं परामृशन्साक्षशरिङ्खणं) मा कुप्यतु। तृतीयप्रकृतिं जानामि

काञ्चनमाला—(सगर्जनं) अळे मुङ्ख तं कहं (अरे मूर्ख, तत्कथं?)

वसन्तकः—तव ताण्डवविशेषः कथयति।

काञ्चनमाला—चिट्ठ गिळामि तुमं (तिष्ठ गिलामि त्वां)

वसन्तकः—ब्राह्मणोस्मि (इति कम्पते)

काञ्चनमाला—(साट्टहासं) ता महंतो प्पमोदो। अवस्सं गिळामि (तर्हि महान्प्रमोदः अवश्यं गिलामि)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वसन्तकः—(सगद्गदं) नाहं ब्राह्मणः।

काञ्चनमाला—ता किं सुद्दओ (तर्हि किं शूद्रकः)

वसन्तकः—आम, न हि न हि

काञ्चनमाला—ता किं सच्चं कहेहि। अण्णहा गिळामि (तर्हि किं सत्यं कथय। अन्यथा गिलामि)

वसन्तकः—कथयामि, कथयामि (स्वगतं) किं कथयेयं

काञ्चनमाला—हूं, ळहु कहेहि (हूं लघु कथय)

वसन्तकः—(सम्लिष्टाक्षरं) ब्राह्मणोस्मि, क्षत्रियोस्मि, वैश्योस्मि, शूद्रोस्मि।

काञ्चनमाला—(साट्टहासं) तं कहं? (तत्कथं)

वसन्तकः—(सावेगकम्पं) हन्त, अहं नाहं।

काञ्चनमाला—किं पासंडो (किं पाषण्डः)

वसन्तकः—(कर्णौ पिधाय) शान्तं पापं शान्तं पापं। वसन्तकोस्मि

काञ्चनमाला—(विहस्य)णम्मसचिवो णु (नर्मसचिवो ननु)

वसन्तकः—(स्तोकं विवृतवदनो नासातले तर्जनीमाधाय) हन्त कथं ज्ञातं

काञ्चनमाला—(संस्कृतमाश्रित्य साट्टहासं) हुं कथं ज्ञातं? पृथ्वीराजस्य नर्मसचिवः खलु वसन्तकः (इति स्वावगुण्ठनमुद्घाटयति)

वसन्तकः—अये, काञ्चनमाला, हन्त, जीर्णमेव भुक्तं सर्वमपि भिया

काञ्चनमाला—(भवतु तावत्) एनं वृत्तान्तं कथयिष्यामि महाराजाय (इति परिक्रामति)।

वसन्तकः—(सदैन्यं साञ्जलिबन्धं) काञ्चनमाले मा गच्छतु भवती। कृपया शिथिलय कूर्चग्रन्थिं,

काञ्चनमाला—(सस्मितं कूर्चग्रन्थिं विमोच्य) तव कथं शकुनागमपरिश्रमः।

वसन्तकः—(सस्मितं) दृष्टं दृष्टमिव वक्तुं कुतो वा शकुनागमपरिश्रमः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

काञ्चनमाला—तर्हि गतस्य आगामिनो वृत्तान्तस्य कथं ?

वसन्तकः—गतं तु तत्र तत्र विचार्य कथमपि ज्ञात्वा कथयामि भविष्य-दुदन्तस्तु उक्तप्रकारेण प्रचलिष्यति वा न वा को वा जानाति।

काञ्चनमाला—भवतु तावत् कुतो वात्रेदृशवेषपरिग्रहः ?

वसन्तकः—रहस्यमेतत्।

काञ्चनमाला—निवेदय, न यदि महाराजाय कथयिष्यामि।

वसन्तकः—(स्वशिरः परामृशन्) ननु भवती संयुक्तायाश्चेटी।

काञ्चनमाला—अथकिं ?

वसन्तकः—त्वयापि रहस्यमिदं पालनीयं।

काञ्चनमाला—तथैव भवतु।

वसन्तकः—अपि सत्यं।

काञ्चनमाला—सत्यमेव।

वसन्तकः—कर्णे (एवमिव)

काञ्चनमाला—(सप्रमोदं) साधु वसन्तक साधु भवदुद्यमस्याहमपि साचिव्यमाचरामि। यतस्संयुक्तायास्तस्मिन्नेवानुरक्तं हृदयं।

वसन्तकः—(सहस्ततालं) महान्प्रमोदः

(निष्क्रान्तौ)

(मिश्रविष्कम्भः)

(ततः प्रविशत्यासनोपविष्टस्सचिवद्वितीयस्सचिन्तो जयचन्द्रः)

जयचन्द्रः—

अमात्यवर्य विचित्रा खलु विधिलीला—

सर्वसम्पत्समृद्धस्याप्यस्यां मर्त्यस्य संसृतौ।
क्लेशोस्ति क्वचिदंशे वा चन्द्रस्याङ्क इव ध्रुवम् ॥ ३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सचिवः—क्वचिदंशेपि नाहं पश्यामि महाराजस्य क्लेशनिदानं—

राज्ये प्रजास्त्वय्यनुरक्तचित्ताः
सर्वेपि भूपा वशवर्तिनस्ते।
पद्मालयासन्निभरूपसम्प-
त्तवास्ति कन्या किमपेक्ष्यमन्यत् ॥ ४ ॥

जयचन्द्रः—एतदेव क्लेशनिदानं—

कन्यापितृत्वं किल दुर्गतस्य
यथार्तिदं पुण्यवतोपि लोके।
तथैव तत्रापि भुजातिदर्प
दुर्निग्रहक्षत्रियसन्ततेर्हि ॥ ५ ॥

पश्यत्वमात्यः—

द्रव्याभावाद्वरनिचयने दुर्गतो नैव शक्तः
श्रीमान्कन्यावितरणविधौ वीक्षते ह्यात्मसाम्यम्।
युद्धाकांक्षी रणभुवि सदा क्षत्रियो भूमिहेतोः
वीरान्वेषी भवति दुहितुर्मङ्गलं कांक्षमाणः ॥ ६ ॥

तदिदानीं संयुक्ता कस्मै दातव्येति महती चिन्ता।

सचिवः—अलं चिन्तया। एतदर्थमेव प्रथममेव मया तावत्कृत्स्नविषयक्षत्रिय-कुमाराणां समानीताः प्रतिकृतयः। प्रथमं तावद्दुहितृहृदयमवगम्यतां। यतः—

गुणापेक्षी यथा तातो माता वित्ताभिकांक्षिणी।
दुहितापि तथा लोके प्रायो रूपैकलोलुपा ॥ ७ ॥

किञ्च, कार्यः खल्वश्वमेधाध्वरो महाराजेन, अवभृथानुपदमेव प्रचलतु नाम स्वयंवरमहोत्सवः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जयचन्द्रः—(विचिन्त्य) साधु मन्त्रितमार्येण, काचिदिह शङ्का—

पृथ्वीपतेरमोघो हि दोर्दण्डश्चण्डविक्रमः।
तन्मया दर्शितो मैत्री तत्र वञ्चनया बहिः ॥ ८ ॥

तदश्वमोक्षः कथमिति।

सचिवः—तत्रापि कपटमैत्रीसहायो भवितुमर्हति महाराजः।

जयचन्द्रः—कथमपि कर्तव्यमेव तस्मिन्किमपि अवज्ञाभिज्ञानं कर्म।

सचिवः—मास्त्विदानीं प्रकृतमनुसरतु महाराजः।

राजा—अमात्यवर्य, अवलोक्यतां तावदध्वरसमग्रपरिकरः, अहंत्वव-गच्छामि दुहितृहृदयं (उत्तिष्ठति)।

सचिवः—तथा (उत्थाय निष्क्रान्तः)।

जयचन्द्रः—(सचिन्तं परिक्रम्य)—

सर्वोत्तरतया स्थातुं पृथ्वीराजमवेक्ष्य तम्।
नैव शक्नोम्यहं हन्त चिन्तास्थानमिदं महत् ॥ ९ ॥

(ध्यानमन्दं परिक्रम्य) भवतु तावत् निर्वर्तिताध्वरो भविष्यामि सर्वोत्तरः (परितो विलोक्य) कः कोत्र भोः ?

प्रविश्य प्रतीहारी—आणवेदु देव्वो (आज्ञापयतु देवः)।

जयचन्द्रः—केदानीं संयुक्ता ?

प्रतीहारी—चंपआरामे वट्टइ (चम्पकारामे वर्तते)।

जयचन्द्रः—तन्मार्गमादर्शय।

प्रतीहारी—इदो इदो। (इतइनः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जयचन्द्रः—(परिक्रम्य) रमणीयोयं चम्पकारामः—

कानि चिन्मुकुलितानि दीपिका-
सन्निभानि विकचानि कानि चित् ।
स्वर्णवर्णरुचिराणि शाखिषु
प्रस्फुरन्ति कुसुमानि पंक्तिशः ॥ १० ॥

(परिक्रम्य सर्वतो विलोक्य) अत्र वासन्तिकालतामण्डपप्रतीहारे प्रवालशिलाफलके समुपविशति वत्सा। कोयमन्यः।

प्रतीहारी—विरूपङ्खइव (विरूपाक्ष इव)

जयचन्द्रः—गच्छ स्वकर्मणे।

प्रतीहारी—तहा (तथा) (निष्क्रान्ता)।

जयचन्द्रः—(कतिचित्पदानि गत्वा) वत्सा किमपि संलपन्तीव, तल्लतामण्डपान्तर्हितः श्रृणोमि तावत् (तथा करोति)।

(ततः प्रविशति वसन्तकद्वितीया यथानिर्दिष्टा संयुक्ता)

संयुक्ता—तदो (ततः)।

जयचन्द्रः—(स्वगतं) पृच्छेदियं पाणिपीडने शकुनं।

वसन्तकः—मद्यात्रावसरे दत्तमिदं (निजोद्गमनीयादादाय दर्शयति)।

संयुक्ता—(सवैलक्ष्यं) कहं तस्स पडिकिदी (आदाय पश्यति) (कथं तस्य प्रतिकृतिः)।

जयचन्द्रः—(विलोक्य) नहि सम्यग्दृष्टिपथमारूढं। कोवा स्यादयं (सचिन्तं) भवतु, अग्रे किंवा प्रचलिष्यति पश्यामः।

वसन्तकः—पठतु भर्तृदारिका चित्राधस्स्थललिखितं।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संयुक्ता—(सहर्षलज्जं) (संस्कृतमाश्रित्य)—

ननु सुन्दराङ्गि तव वक्त्रपङ्कजं
मम दृग्युगं च मनसा समं यदा।
विचकर्ष हन्त विवशोस्म्यहं तदा
प्रभृति प्रजागरकृशाङ्गविह्वलः ॥ ११ ॥

जयचन्द्रः—(स्वगतं) कुत्राप्यनुरक्तेव वत्सा, यदीदमाभिजात्यानुरूपं भवेत्, तदा शिथिलितो मे भारः। अयञ्चात्मनिर्विशेषो भवेत्सौहार्देन।

संयुक्ता—(वक्षसि निगूह्य चित्रफलकं स्वगतं) हिअअ, तुमं आणंदसमुद्दमग्गं मं वि विवेअविअळं करेसि, उट्ठेहि ठावेहि मं जहपुव्वं विअ (प्रकाशं) अवि सच्चं (हृदय त्वमानन्दसिन्धुमग्नं मामपि विवेकविकलं करोषि। उत्तिष्ठ स्थापय मां यथापूर्वमिव। अपि सत्यं ?)

वसन्तकः—हन्त, नाद्यापि विस्रम्भः ?

संयुक्ता—(समन्दस्मितं) अत्थि विस्संभो। मह दसं सुमरिअ एव्वं पुच्छिदं (दक्षिणाक्षिस्पन्दनं सूचयित्वा) किण्णु खु एदं पडिप्फुरइ मह दक्खिणं अक्खि (अस्ति विस्रम्भः मम दशां स्मृत्वा एवं पृष्टं। किन्नु खल्विदं परिस्फुरति मम दक्षिणमक्षि)

वसन्तकः—(वामाक्षिस्पन्दनं सूचयित्वा) अलं चिन्तया मम वामाक्षिस्पन्दनं परिहरति ते दक्षिणाक्षिस्पन्दनदोषं।

संयुक्ता—होदु दाव दोसपडिहारकिदे चित्तगदं णं वम्महं अब्भच्चेमि। (इति लतोपाश्रयं चित्रफलकं प्रवालशिलातले समुपवेश्य करग्राह्याणि चम्पककुसुमान्यपचिनोति) (भवतु तावत् दोषपरिहारकृते चित्रगतमेनं मन्मथमभ्यर्चयामि)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जयचन्द्रः—(विलोक्य) हन्त, रूपराशिरिव—

ईशानफालनयनज्वलनाभिदग्धे
कामे तदा पुनरपि प्रतिपन्नतर्षः।
स्रष्टा सिसृक्षुरिव रूपपरीक्षणार्थं
चित्रे लिखेदमुमहो प्रथमं पुमांसम् ॥ १२ ॥

संयुक्ता—(सहर्षं संस्कृतमाश्रित्य) एतद्ग्रथनकर्म भवता निर्वाह्यं।

वसन्तकः—तथास्तु (इति कुसुमदलानि ग्रथ्नाति)

संयुक्ता—(सस्मितं) किन्नु खल्वेवं? वृन्तानां ग्रथनं नतु दलानां।

वसन्तकः—मम तावदेवं परिचयः।

जयचन्द्रः—अयं तु नर्मनिष्णात इव।

संयुक्ता—तर्हि मास्तु, ग्रथ्नाम्यहमेव (तथा करोति)

जयचन्द्रः—(चित्रफलकं निर्वर्ण्य स्वगतं) किन्नु खल्विदं अस्मद्विपक्षप्रतिकृतिरिव।

वसन्तकः—किमिदानीमेव स्वयंवरमहोत्सवः प्रचलति।

संयुक्ता—(समन्दस्मितं) ब्राह्मणवचनादेवमेवास्तु (इति मालामर्पयितुमुद्युङ्क्ते)

जयचन्द्रः—नाहमुत्सहे (सहसोपसृत्य सामर्षं) कोयमुद्यमः (इति मालामाच्छिद्य दूरे प्रक्षिप्य चित्रफलकमादत्ते)।

वसन्तकः—(सोद्वेगकंपं जनान्तिकं) का गतिः?

संयुक्ता—(सभयकंपं जनान्तिकं) किं भविष्यतीति न जाने।

जयचन्द्रः—(वसन्तकमवलोक्य) तथ्यमावेदय कस्त्वं?

वसन्तकः—(स्वगतं) गहीदोह्मि णेण तं दाणिं जं होदव्वं तं होदु णाम (प्रकाशं) कश्चन मनुष्योस्म्यहं (गृहीतोस्म्यनेन तदिदानीं यद्भव्यं तद्भवतु नाम)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जयचन्द्रः—हुं (सामर्षं) जानामि त्वां मनुष्यं। तथ्यमावेदय कस्त्वं।

वसन्तकः—आवेदितं किल?

जयचन्द्रः—दण्ड्योसि। यदि नावेदयसि।

वसन्तकः—भवतु दण्डः सज्जोस्मि।

जयचन्द्रः—(सदन्तपीडं) किं सज्जोसि? (कूर्चं गृहीत्वाकर्षति)।

संयुक्ता—(सोद्वेगं) माखु, माखु (इत्युपसर्पति) (मा खलु मा खलु)।

जयचन्द्रः—(सामर्षं संयुक्तां दूरं परिणुद्य) कथमायातोयं चित्रफलकः (संयुक्ता-त्रेपमाना तूष्णीं तिष्ठति)

वसन्तकः—मया समानीतः।

जयचन्द्रः—तर्हि कस्त्वं।

वसन्तकः—कस्त्वमिति चेत्? किं कथयेयं?

जयचन्द्रः—तर्हि न कथयसि, हुं भवतु। कः कोत्र भोः?

प्रविश्य **वनपालः**—आणवेदु देव्वो (आज्ञापयतु देवः)

जयचन्द्रः—क्षिप्रमानय नागरिकश्यालं।

वनपालः—तहा (तथा) (निष्क्रान्तः)

वसन्तकः—(स्वगतं) का गई सद्दूळहत्थे णिवडिदो कुळंगो विअ संउत्तोह्मि। (का गतिः शार्दूलहस्ते निपतितः कुरङ्ग इव संवृत्तोस्मि)

जयचन्द्रः—न कथयसि खलु सत्यं।

प्रविश्य **श्यालः**—(साञ्जलिबन्धं) अयमहमस्मि।

जयचन्द्रः—अस्य तावत्कुम्भीरकस्य निस्सारय वदनात्तथ्यांशं।

श्यालः—तथा (इति निजकरकशां शब्दापयन्गलहस्तिकया वसन्तकं परिनुदन्निष्क्रान्तः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संयुक्ता—(साञ्जलिबन्धं संस्कृतमाश्रित्य) मा कुप्यन्तु तातपादाः।

जयचन्द्रः—(सदन्तपीडं) किं किं माकुप्यन्त्विति। भवती वा तथ्य मावेदयतु स तु कः?

(संयुक्ता-अवनतमुखी तिष्ठति)

वसन्तकेन प्रविश्य **श्यालः**—अयन्तु कथयति पृथ्वीराजस्य नर्मसचिवो वसन्तक इति।

जयचन्द्रः—कथं पृथ्वीराजस्य। नर्मसचिवः इदं तावद्वेषपरिवर्तनं कुतः?

श्यालः—(वसन्तकमवलोक्य) हूं निवेदय।

वसन्तकः—(स्वशिरः परामृशन्) उदरपूरणाय।

श्यालः—(कशामुद्यम्य) वैधेय! किमनेन भवति?

वसन्तकः—किन्नु खल्विदं प्रतिवचनं कशाचालनं। किमु मां दस्युं जानासि ब्राह्मणोस्मि।

जयचन्द्रः—स्यान्नाम निवेदय।

वसन्तकः—वेषपरिवर्तनं कुत इति।

जयचन्द्रः—आम।

वसन्तकः—पाणिपीडनार्थं।

जयचन्द्रः—कस्य कस्याः?

वसन्तकः—पृथ्वीराजस्य संयुक्तायाश्च।

जयचन्द्रः—(सदन्तपीडं) शठ, भ्रातृव्यसम्बन्धं कल्पयसि (श्यालमवलोक्य) निवेशय तावदेनं बन्धनागारे।

श्यालः—(साञ्जलिबन्धं) यथादिशति महाराजः। (इति वसन्तकबाहुमाकर्ष-निष्क्रान्तः)

(नेपथ्ये)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सज्जा भटाः कवचिता निशितास्त्रघोराः
यान्तु क्षितिभ्रमणलभ्ययशःप्रकाशाः ।
रक्षन्तु यज्ञपशुमश्वममुं विमुक्तं
संवार्य धैर्यविवशीकृतशूरलोकाः ॥ १३ ॥

जयचन्द्रः—(आकर्ण्य) हन्त विमुक्त इव यज्ञपशुरपि।

प्रविश्य **सचिवः**—दीक्षापरिग्रहाय यज्ञक्षेत्रं प्रविशतु महाराजः।

जयचन्द्रः—(सक्रोधं)—

विपक्षसक्तचित्तेयं वराकी तापकारिणी।
दुहिताप्यहिताकारा कारायां स्थाप्यतां शठा ॥ १४ ॥

सचिवः—(साञ्जलिबन्धं) किन्नु खल्विदं। अस्थाने क्रोधः ?

जयचन्द्रः—किमभिहितं ? अस्थाने क्रोध इति। पश्यत्वार्यः (चित्रफलकं दर्शयति)।

सचिवः—(विलोक्य) हन्त भोः पृथ्वीराजोयं।

जयचन्द्रः—एनमन्तरा नान्यं वृणोमीत्यस्यास्सङ्कल्पः।

(सचिवः—संयुक्ताया मुखं पश्यति)

संयुक्ता—तत्सत्यं।

जयचन्द्रः—क्षीरवर्धितेयं भुजङ्गीव क्ष्वेलमुद्गिरति।

सचिवः—मा कुप्यतु महाराजः। कथमप्यहं तावदस्याः परिवर्तयामि मनः।

जयचन्द्रः—तर्हि क्षिप्रं नयत्वार्यः क्वाप्येनां। मा तिष्ठतु मत्पुरतः।

सचिवः—तथा (संयुक्तया निष्क्रान्तः)।

जयचन्द्रः—(दीर्घं निश्वस्य)—

उदरजा दुहितैव यदीदृशी
कथमहं सुहितो हितकांक्षया।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इदमरुन्तुदमाविरभून्मह-
द्धृदयशल्यमकल्यमतर्कितम् ॥ १५ ॥

(विचिन्त्य) भवतु प्रकृतमनुसरामः ।

(निष्क्रान्तः)

॥ इति द्वितीयोऽङ्कः ॥

तृतीयोऽङ्कः

(ततः प्रविशति सचिन्तः पृथ्वीराजः)

पृथ्वीराजः—(दीर्घमुष्णं निश्वस्य)—

स्यान्नाम नर्मसचिवो निगलेन बद्धः
तं मोचयिष्यति स एव मदीयलेखः ।
तां क्लेशयत्यतुलकोमलसुन्दराङ्गीं
लोलेक्षणामिति यदद्य न तत्सहेऽहम् ॥ १ ॥

प्रविश्य नैध्रपः—महाराज जयचन्द्रो विज्ञापयति पत्रमुखेन । बद्धदीक्षोहं महाराजाज्ञया विमुक्तो वसन्तकः । प्रेषितश्च । तदद्य महाराजगृहीतं यज्ञपशुमश्वं विमोक्तुमर्हति महाराज इत्यभ्यर्थये इति ।

पृथ्वी—क्व वसन्तकः ?

नैध्रपः—इत एवागच्छति ।

पृथ्वी—विमुच्यतामश्वः ।

नैध्रपः—तथा (इति निष्क्रान्तः) ।

पृथ्वी—

मदाश्रयात्प्रभुर्भूत्वा जयचन्द्रो वसन्तकम् ।
जिजीविषुर्मदीयं तं कथं वा न विमोचयेत् ॥ २ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(ततः प्रविशति विदूषकः)

विदूषकः—कहं विअ दाणिं महाळाअस्स दंसइस्सं मुहं। अहवा किदकज्जस्स मह किं वा इमाए चिंदाए (कथमिवेदानीं महाराजाय दर्शयिष्यामि मुखं। अथवा कृतकार्यस्य मम किं वानया चिन्तया।

पृथ्वी—(दूरादवलोक्य)—

मन्दद्युतिश्श्लथगतिर्गलितात्मधाष्टर्यः
चिन्ताविजृम्भितविकारकदर्थितास्यः।
आयात्यहो मम सुहृद्विमना द्विजोयं
प्राभातिकेन्दुसदृशः किमिदं किमर्थम् ॥ ३ ॥

विदू—(मन्दमुपसृत्य) वअस्स (इत्यर्धोक्तौ) महाळाअ (वयस्य। महाराज)।

पृथ्वी—वयस्य, अलमकृतकार्यभिया एहि तावत्। इदमासनं।

विदू—माखु आसणं। दूळे चिट्ठामि (माखल्वासनं दूरे तिष्ठामि।

पृथ्वी—नहि तथा प्रष्टव्यमस्ति। उपविशतु भवान्।

(विदूषकः—अनिच्छन्नुपविशति)

पृथ्वी—वयस्य, अलं चलितानुशोचनेन कथमिव शठेन प्रत्यभिज्ञातो भवान्।

विदू—(सनिर्वेदं) किं कहइस्सं। चित्तफळअहत्थो ग्गहीदो (किं कथयिष्यामि चित्रफलकहस्तो गृहीतः)।

पृथ्वी—अलं निर्वेदेन। सविस्तरं कथयितुमर्हति भवान्।

(विदू—सविस्तरं यथावृत्तं कथयति)

पृथ्वी—(सावेगं)—

प्रथमं या ज्योत्स्नेव
प्रकटितविभवा दृशोर्ममाविरभूत्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सम्प्रति सैव श्रवसी
प्रविशति विवशाशनिप्रतीकाशा ॥ ४ ॥

हन्त मत्कृते कष्टमनुभवति मृगाक्षी (सचिन्तं) किं करोमि ?—

दोर्दण्डदर्पस्य न पात्रमेव
यद्वैतसीं संश्रयते स वृत्तिम् ।
अधीन इत्यप्यनुपेक्षणीयः
शाठ्येन यद् द्रुह्यति मह्यमेवम् ॥ ५ ॥

भवतु तावत्, वयस्य अपि जानासि तत्रामात्यावसथे तस्याः कीदृशी स्थितिरिति ।

विदू—(सबाष्पगद्गदं संस्कृतमाश्रित्य) जानामि प्रस्थानावसरे तस्याश्चेट्या काञ्चनमालया भणितं ।

पृथ्वी—कथय कथय कथं वर्तते सा मृगाक्षी ।

विदू—(चेलाञ्चलेन नयनयुगलं परिमृजन्) न खादति, न पिबति, न स्नाति, न स्वपिति, तव नामैकस्मरणाहारा लावण्यमयी तनुतनुलता सद्यस्समुत्पाटितबिसनीव मन्मथमार्तण्डतापम्लायमाना वर्तत इति ।

पृथ्वी—(दीर्घं निश्वस्य) सखे, अलं श्रुतेन—

शिरीषमृदुलाङ्गका वरकरीशकुम्भस्तनी
सरीसृपसुवेणिका हिममरीचिरम्यानना ।
अरालचलकुन्तला कलमरालपादक्रमा
कथन्नु परिखिद्यति प्रतिपदं मदर्थं प्रिया ॥ ६ ॥

सखे केदानीमस्मत्प्रतिकृतिः ?

विदू—गता खलु तस्य हस्तं ।

पृथ्वी—हन्त, अस्मत्परिपन्थिवशंवदा किमु ?

विदू—अन्यच्च यादृशी प्रतिकृतिः तादृश्येव प्रतिमा कार्यते कारुणा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पृथ्वी—शठः किमपि वैरानुगुणं चेष्टत इव।

(नेपथ्ये)

वसुमन्तं समायातं रागेण गणिका यथा।
निरंशुकं तथा कृत्वा सन्ध्या निष्कासयत्यहो ॥ ७ ॥

पृथ्वी—(निशम्य) अचिन्तनीयं खलु स्त्रीहृदयं (उत्तिष्ठति)।

प्रविश्य प्रतीहारी—देव्व को वि कण्णाखुज्जादो अस्सारूढो आअदो देव्वं दट्ठुकामो दुवारे चिट्ठइ (देव कोपि कन्याकुब्जादश्वारूढ आगतः देवं द्रष्टुकामो द्वारे तिष्ठति)।

पृथ्वी—कथं कन्याकुब्जात्? सत्वरं प्रवेशय।

प्रतीहारी—जं देव्वो आणवेदि (निष्क्रान्ता) (यद्देव आज्ञापयति)।

(ततः प्रविशति पुरुषनैपथ्या काञ्चनमाला)

काञ्च—(अध्वपरिश्रममभिनयन्ती साञ्जलिबन्धं तिष्ठति)।

पृथ्वी—कस्त्वं, किमागमनकारणं?

काञ्च—(संस्कृतमाश्रित्य) देव, किमपि विवक्षुरस्मि।

पृथ्वी—किमु रहस्यं?

काञ्च—अथकिं?

पृथ्वी—स्यान्नाम। सविस्रम्भं कथय। आत्मनिर्विशेषोयं वसन्तकः।

काञ्च—देव, महान्प्रमादः।

पृथ्वी—निर्भयं निवेदय।

विदू—(सवितर्कं) किण्णु खु इद्धिआकंठणादो विअ अणुहूदपुव्वो विअ अ। किं तुमं कंचणमाळा? (किन्नु खलु स्त्रीकण्ठनाद इव अनुभूतपूर्व इव च किं त्वं काञ्चनमाला)।

काञ्च—अथकिं?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विदू—हंहो संजुत्ताए चेडी (हंहो संयुक्तायाश्चेटी)।

पृथ्वी—कथं, संयुक्तायाश्चेटी।

काञ्च—देव्व मह भट्टिदारिआ ज्जळणे शळहत्तणं गमिस्सइ। ता पडित्ताअदु। (देव मम भर्तृदारिका ज्वलने शलभत्वं गमिष्यति। तत्परित्रायतां)।

पृथ्वी—(साक्रेगं) किमर्थं? सविस्तरं निवेदय।

काञ्च—देव्व, बद्धदिक्खो अह्माणं भट्टा णिसंसेहिं जवणेहिं समक्कंतो णिअळिदो अ (देव बद्धदीक्षोस्माकं भर्ता नृशंसैर्यवनै स्समाक्रान्तो निगलितश्च)।

पृथ्वी—हन्त यवनैर्निगलितः? ततः।

काञ्च—अमच्चघरठिदा भट्टिदारिआ उण जवणादो फळिसदोसं पळिहळंती एव्वं किदसंकप्पा वट्टइ (अमात्यगृहस्थिता भर्तृदारिका पुनः यवनात्स्पर्शदोषं परिहरन्ती एवं कृतसंकल्पा वर्तते)।

पृथ्वी—नात्याहितं भवेदियता कालेन?

काञ्च—बळादो अमच्चप्पडिसिद्धावि किदसंकप्पणिव्वहणस्स सज्जा वट्टइ (बलादमात्यप्रतिषिद्धापि कृतसंकल्पनिर्वहणाय सज्जा वर्तते)।

विदू—का गई! वअस्स, तुवरेहि तुवरेहि (का गतिः। वयस्य, त्वरस्व त्वरस्व)।

पृथ्वी—कः कोत्र भोः?

प्रविश्य **द्वारपालः**—आअदोह्मि (आगतोस्मि)।

पृथ्वी—अश्वोऽश्वः।

द्वारपालः—णिवेदेमि (निष्क्रान्तः) (निवेदयामि)।

पृथ्वी—सखे श्रृणु तावत्—

धीरोहं विनिवार्य धैर्यवशतो म्लेच्छांस्तु मूर्च्छाकुला-
न्कृत्वैकः करवालपाणिरचिरात्तं मोचयित्वा नृपम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भीतां तामपि वह्निहेतिपतनात्पूर्वं समाश्वास्य च
प्रीत्या तत्करपल्लवं मृदुतरं तत्र ग्रहीष्यामि च ॥ ८ ॥

काञ्चनमाले मा भैषीः। प्रयाहि।

काञ्च—(सहर्षं) जं देव्वो आणवेदि (निष्क्रान्ता) (यद्देव आज्ञापयति)।

विदू—(शिरः परामृशन्) मं उज्झिअ पाणिग्गहणमहूसवं अणुहोदुकामो विअ वअस्सो (मामुज्झित्वा पाणिग्रहणमहोत्सवमनुभवितुकाम इव वयस्यः)।

पृथ्वी—नहि तथा—

युद्धे जित्वा विपक्षौघमानेष्यामि ततस्सखे।
भवन्तं मद्विवाहार्थं तदलं चिन्तया मुधा ॥ ९ ॥

(इति विदूषकद्वितीयो निष्क्रान्तः)

॥ इति तृतीयोऽङ्कः ॥

चतुर्थोऽङ्कः

(ततः प्रविशति रथाधिरूढो विदूषकद्वितीयः पृथ्वीराजः)

पृथ्वी—(सनिर्वेदं) वयस्य—

म्लेच्छान्विजित्य जयचन्द्रमपायतस्तं
संमोच्य राज्यभरमप्यधिरोप्य तस्मिन्।
अन्वेषितापि न हि दृक्पथगा मृगाक्षी
कान्तारभागभवदित्यपि किंवदन्ती ॥ १ ॥

विदू—रण्णे कहं अण्णेसइ भवं (अरण्ये कथमन्वेष्यति भवान्।

पृथ्वी—पश्यामस्तवत्। सारथे, वाजिनः प्रजविनः कुरु।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सूतः—तथा (प्रग्रहान्शिथिलयति)।

पृथ्वी—सखे पश्य—

हयखुरपुटकीर्णैर्धूलिसंघैर्निगूढः
स्थपुटिततलयानग्राप्तचक्राभिघातः।
निजगतमपि शश्वद्वल्गयन्धीरनादः
वलयिततरुपण्डो धावति स्यन्दनोयम् ॥ २ ॥

सारथे स्थापय तावद्रथं—

निम्नोन्नतं स्थलमिदं बहुगुल्मसान्द्रं
वृक्षौघरुद्धमतिपीवरनाकुदुस्थम्।
नानालतावलयितं दृगगोचरान्त-
र्वर्त्मात्र गच्छति कथं विपिने शताङ्गः ॥ ३ ॥

विदू—दाणिं किं करणिज्जं। वेवइ मह हिअअं। तं णिव्वट्टेहि रहं। अह्माणं णअरं एव्व गच्छह्म (इदानीं किं कर्तव्यं। वेपते मम हृदयं। तन्निवर्तय रथं। अस्माकं नगरमेव गच्छामः)।

पृथ्वी—किमेवं, अकृतकार्याः खलु वयं ?

विदू—(सावेगं) ता एआरिसे रण्णे एव्व चिट्ठिदव्वं (तर्हि एतादृशे अरण्ये एव स्थातव्यं)।

पृथ्वी—(विहस्य) नहि स्थातव्यं। गन्तव्यं पुरतः।

विदू—हंहो कहं (हंहो कथं)।

पृथ्वी—पादचारिणौ। गच्छावः। सारथे, वाहानत्रैव विगतश्रमान्कुरु, यावत्प्रत्यागमनं (रथादवतीर्य) अवतरतु भवान्।

विदू—ण हं ओदरेमि। रण्णमसअसंघो मुहं परिदो आहिंडंतो गाअइ कण्णपहम्मि। तुदइ चळणं शक्करासिळिट्ठो कंटअणिअरो। ता गच्छदु भवं एक्को एव्व। हं उण रहे णिसण्णो प्पडिपाळेमि तुह प्पडिआअमणं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(नाहमवतरामि। अरण्यमशकसंघो मुखं परितः डयमानः गायति कर्णपथे। तुदति च चरणं शर्कराश्लिष्टकंटकनिकरः। तद्गच्छतु भवानेक एव अहं पुनः रथे निषण्णः प्रतिपालयामि तव प्रत्यागमनं)।

पृथ्वी—(सस्मितं) एवमस्तु—

एकं त्वामवलोक्य शस्त्ररहितं कान्तारभाजो हठा-
द्घोरारावभयङ्कराः परिपतन्त्युल्लंघ्य सिंहादयः।
इच्छा स्याद्यदि ते तथैव भवतु प्रस्थानसज्जोऽस्म्यहं
सङ्कल्पानुगुणं विधाय सहसा प्रत्यागमिष्यामि च ॥ ४ ॥

(इति गन्तुमुद्युङ्क्ते)।

विदू—चिट्ठ दाव हं एक्को एव्व एत्थ ठादुं ण पारेमि (इति रथादवतरति) (तिष्ठ तावत् अहमेक एवात्र स्थातुं न पारयामि)।

पृथ्वी—(सस्मितं) एतादृशे वर्त्मनि चरणेन गन्तव्यं।

विदू—होदुदाव। जीवंतो भद्दाणि पेक्खइ (भवतु तावत्। जीवन्भद्राणि पश्यति)।

पृथ्वी—मन्दमागच्छतु वयस्यः।

विदू—वग्घो विअ एत्थ आहिंडामि (परिक्रामति) (व्याघ्र इवात्राहिण्डामि)।

पृथ्वी—हन्त चण्डमयूखश्चण्डतां गतः—

चञ्चन्महीरुहदलोत्थितसूर्यघृष्टि-
तेजोविशेषपिहिताक्षियुगं समन्तात्।
प्रच्छायसुप्तहरिणार्भकमुज्वलार्क-
तापादरण्यमचलं स्वपितीव सत्वैः ॥ ५ ॥

विदू—हंहो बुहुक्खा बाहेइ। हं उण इमस्सिं ओसरे प्पासादे किदब्भवहारो णिद्दासुहं अणुहवंतो हुवमु। दाणिं एत्थ उम्मत्तो विअ चंडादवे आहिंडामि (श्रममभिनीय) वअस्स, एव्वं केत्तिअं दूळं गंदव्वं (हंहो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

बुभुक्षा बाधते। अहं पुनरस्मिन्नवसरे प्रासादे कृताभ्यवहारो निद्रा-सुखमनुभवन्भवेयं। इदानीमत्रोन्मत्त इव चण्डातपे आहिण्डामि। वयस्य एवं कियद्दूरं गन्तव्यं।

पृथ्वी—पश्य तावदनतिदूर एव—

स्तोकम्लानविदूसरच्छदततप्रच्छादनं कीचक-
प्रायापुस्तसुशस्तमृण्मयबहिःकुड्यं लताप्रावृतं।
स्थाणुस्तम्भशिरोविनम्रवलभिप्रच्छादितप्राङ्गणं
गोविड्लेपनचिक्कणायततलं वेश्मात्र सन्दृश्यते ॥ ६ ॥

तत्र तावत्पश्यामः। सखे वेषपरिवर्तनेन गन्तव्यं। अन्यथा प्रत्यभिज्ञातौ भवावः।

विदू—ता केण वेसेण गंदव्वं (तर्हि केन वेषेण गन्तव्यं)।

पृथ्वी—भिक्षुवेषमवलम्बावहे (उभावपि तथा भवतः)।

विदू—(सस्मितं संस्कृतमाश्रित्य)—

काषायाम्बरसंवीतो बद्धकूर्चो भवानहो।
विरक्त इव संसारे दृश्यते साधु सम्प्रति ॥ ७ ॥

पृथ्वी—(सस्मितं) भवानपि तथा।

विदू—ता तुमं ळावणो वा अज्जुणो वा (तर्हि त्वं रावणो वाऽर्जुनो वा)।

पृथ्वी—यः कोपि वा भवतु।

विदू—तह णहि, लावणो णेण वेसेण ळद्धत्थो णहि अज्जुणो लद्धत्थो खु (तथा नहि रावणोऽनेन वेषेण लब्धार्थो नहि। अर्जुनो लब्धार्थः खलु)

पृथ्वी—(विहस्य) तथैव भवतु। परिक्रामति)

विदू—वअस्स णादिदूळे कावि तावसी विअ (वयस्य नातिदूरे कापि तापसीव)।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पृथ्वी—अपि नाम तां पृच्छामः। कस्तत्र पर्णशालायामिति।

विदू—(स्तोकं गत्वा निर्वर्ण्य) तावसीवेसा कंचणमाळाविअ दीसइ तापसीवैषा काञ्चनमालेव दृश्यते)।

पृथ्वी—कथं काञ्चनमाला ?

विदू—तं तुमं रुक्खंदरिदो होहि। हं गदुअ आभासइस्सं (तत्त्वं वृक्षान्तर्हितो भव अहं गत्वा आभाषयिष्यामि)।

(पृथ्वी—तथा करोति)

(ततः प्रविशति तापसीवेषा कलशपाणिः काञ्चनमाला)

काञ्च—(श्रममभिनीय) पडिस्समट्ठाणं खु रण्णं (परिश्रमस्थानं खलु अरण्यं)

विदू—(उपसृत्य) भवति, भिक्षां देहि।

काञ्च—(संस्कृतमाश्रित्य) अत्र किमस्ति ? अस्ति पानीयं।

विदू—पिपासाकुलां रसज्ञां तर्पय सेचनेन।

काञ्च—(स्वगतं) कण्ठरवेण वसन्तक इव भर्तृदारिकान्वेषे कृतोद्यमेनानेन भवितव्यं (प्रकाशं) भगवदर्थं नीयते।

विदू—तर्हि रसज्ञा शुष्कैव भवतु ?

काञ्च—नीरसे कानने तया शुष्कयैव भवितव्यं।

विदू—किन्नु खल्विदं। ब्रवीषीव मामरसिकं कुत्सिताननं च।

काञ्च—नहि तापसं भवन्तं। किन्तु वसन्तकं नर्मसचिवं।

विदू—(नासाग्रे तर्जनीमाधाय) हन्त, कथं ज्ञातं वसन्तक इति तापस्या।

काञ्च—(सस्मितं) तपश्शक्त्या।

विदू—किन्नु खलु तपश्शक्त्या। आं ज्ञातं ममाप्यस्ति तापसस्य सा शक्तिः भवती काञ्चनमाला ननु।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

काञ्च—(नासातले तर्जनीमाधाय) हन्त, कथं ज्ञातं ?

विदू—उक्तं किल तपश्शक्त्येति।

काञ्च—भवतु कुत्रानुष्ठितमीदृशं तपः।

विदू—राजधान्यां।

काञ्च—(सस्मितं) हन्त, राजधान्यां ?

विदू—आम, राजानुवर्तनं तपः खलु।

काञ्च—युज्यते, ममापि तथैव।

विदू—अस्तु नाम। कुतो वा वनवासः ?

काञ्च—(कर्णे) एवमिव।

विदू—(सहस्ततालं) मम परिश्रमोपि सफलो जातः। कृतकृत्योस्मि। वयस्य, इतस्तावत्।

पृथ्वी—(उपसृत्य) किन्नु खलु हृष्ट इव।

विदू—आम, कानने काञ्चनमाला समुपलब्धेति तवायंवेषस्सफलो जात इति च।

काञ्च—इन्त, महाराजोप्यत्रैव (विदूषकमुपसृत्य कर्णे) एवमिव।

विदू—(विचिन्त्य) कुत्र अमात्यः।

काञ्च—सतु माध्यन्दिनस्नानार्थं सरसीं प्रयातः (निष्क्रान्ता)।

विदू—वयस्य, सन्निहिता भवति नयनसुधा सज्जो भव।

पृथ्वी—(नेपथ्याभिमुखमवलोक्य) सखे पश्य—

चीराम्बरावृततनुर्ललितोत्तमाङ्ग-
केशातपग्लपितकान्तिरनञ्जनाक्षी।
वक्त्राब्जदर्शितनिरन्तरदीर्घचिन्ता
शापात्तमर्त्यतनुयष्टिरिवामरीयम् ॥ ८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विदू—इदानीं सम्यगाभाषय। लब्धावसरोसि।

पृथ्वी—किन्नु खलु, असंस्तुतमुग्धाहृदय इव—

अन्तःपूर्णानुरागापि धुरि पुंसो न भाषते।
नम्रताम्रमुखी स्तोकं दृशा भावं प्रकाशयेत् ॥ ९ ॥

(ततः प्रविशति काञ्चनमालया संयुक्ता)

संयुक्ता—किमु तावसवेसेण (किमु तापसवेषेण)।

काञ्च—अहइं। तवस्सिणिं दट्ठुं तावसो आअदो (अथकिं। तपस्विनीं द्रष्टुं तापस आगतः)

संयुक्ता—मह वेसं ओळोइअ किंति जाणादित्ति ण जाणामि (मम वेषमवलोक्य किमिति जानातीति न जानामि)।

काञ्च—तुमं तस्स वेसं ओळोइअ किंति जाणासि (त्वं तस्य वेषमवलोक्य किमिति जानासि)।

संयुक्ता—तंगदं सव्वं अ जाणामि रमणिज्जं (तद्गतं सर्वमपि जानामि रमणीयं) (परिक्रामति)।

विदू—पुच्छ कुसळं (पृच्छ कुशलं)।

पृथ्वी—(उपसृत्य) अपि कुशलं ?

(संयु—अवनतमुखी सबाष्पं तिष्ठति)

पृथ्वी—

कान्तारवासपरिखेदितकान्तकाये
कान्तानुयोगमवकर्ण्य नहि स्मितास्या।
मूकेव नम्रवदना विरहातुरं मां
खिन्नं पुनश्च ननु खेदयितुं किमेवम् ॥ १० ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संयुक्ता—(काञ्चनमालामवलोक्य) णिवेदेहि मह दसं सुमरिअ भीदा एव्वं संउत्तह्मित्ति (निवेदय मम दशां स्मृत्वा भीतैवं संवृत्तास्मीति)।

पृथ्वी—

श्रोतुकामो भवद्वाणीं दासस्सन्निहितश्चिरात् ।
औदास्यं मयि युक्तं किं सिञ्च श्रोत्रे सुधां प्रिये ॥ ११ ॥

संयुक्ता—सठो मह तादो किंवा करिस्सदित्ति मीदं हिअअं मं णिरुणद्धि आळविदुं वि (शठो मम तातः किंवा करिष्यतीति भीतं हृदयं मां निरुणद्धि आलपितुमपि)।

पृथ्वी—किमद्यापि शाठ्यमवलम्बते ते तातः ?

काञ्च—देव्वस्स प्पडिमं ओळोइअ भीदा एव्वं जाणादि बट्टिदारिआ (देवस्य प्रतिमामवलोक्य भीतैवं जानाति भर्तृदारिका)।

विदू—हंहो तुए ळद्धोवकिदीवि सो ण मुंचइ सठत्तणं (हंहो त्वया लब्धोपकृतिरपि स न मुञ्चति शठत्वं)।

(नेपथ्ये)

पृथ्वीराजभुजार्दिताश्च यवना राजापि सम्मोचितः
स्वे राज्ये विनिवेशितः करुणया तेनैव मान्यात्मना ।
एवं गूढचरेण साधु गदितं गन्तव्यमस्माभिर-
प्यात्मस्थानमितस्स्वयंवरकृते कर्तव्यकार्यं बहु ॥ १२ ॥

विदू—को एव्वं भणादि। (क एवं भणति)।

काञ्च—अमच्चो आअदो विअ। (अमात्य आगत इव)।

संयुक्ता—अह्मो, अज्जउत्तेण मोइदो मह तादो (अहो, आर्यपुत्रेण मोचितो मम तातः ?)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पृथ्वी—आम—

द्विषन्नपि भवत्तातो भवदर्थं विमोचितः।
तथापि स तु शाठ्येन कर्तुं किमपि यत्नवान् ॥ १३ ॥

संयुक्ता—(सनिर्वेदं) अज्ज किं करणिज्जं। कप्पिदो सअंवरमहूसओ। (अद्य किं करणीयं, कल्पितस्स्वयंवरमहोत्सवः)।

पृथ्वी—प्रचलतु नाम, अहमपि सज्जोस्मि।

विदू—किं अणाहूदो गच्छइ वअस्सो। (किमनाहूतो गच्छति वयस्यः)।

पृथ्वी—रत्नहारी खल्वहं।

विदू—किण्णु खु, ओहळणे सज्जो विअ। (किन्नु खलु, अपहरणे सज्ज इव)।

पृथ्वी—अथकिं—

कृष्णो यथा तथैवाहं शठे शाठ्यं प्रदर्शयन्।
मुग्धामपजिहीर्षामि पश्य मे चण्डविक्रमम् ॥ १४ ॥

(संयु—सानन्दलज्जं शिरो नमयति)।

(नेपथ्ये) काञ्चनमाले क्व संयुक्ता ?

काञ्च—अह्महे, आहूअदि अमचो। तं गच्छह्मो वअं। (अहो आह्वयत्यमात्यः तद्गच्छमो वयं)।

विदू—संजुत्ते, अळं भीदाए। वअस्सेण संजुत्ता हविस्ससि (संयुक्ते अलं भीत्या। वयस्येन संयुक्ता भविष्यसि)।

संयुक्ता—समन्दाक्षमन्दहासं राजानमेव पश्यन्ती काञ्चनमालया निष्क्रान्ता)।

पृथ्वी—पश्यामस्तावत्किं वा प्रचलिष्यति कन्याकुब्जे।

(इति निष्क्रान्तास्सर्वे)

॥ इति चतुर्थोऽङ्कः ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्चमोऽङ्कः

(ततः प्रविशति तापसवेषविदूषकद्वितीयस्तापसवेषः पृथ्वीराजः)

पृथ्वी—सखे, अपि नाम पश्यसि कन्याकुब्जवैभवं—

गतागतजनाकुला विविधवस्तुभव्यस्थली
वितानितपटी स्फुरत्प्रथितरत्नभूपोज्वला।
निरन्तरफलैस्सुमैर्मृदुलनागवल्लीदलैः
विभाति विपणिस्सदाप्युपयमस्थलीवातता ॥ १ ॥

विदू—(संस्कृतमाश्रिस्य सहासं) पश्यतु वयस्यः—

मुण्डितश्मश्रुगण्डास्तु षण्डास्ताण्डवपण्डिताः।
गायन्तस्स्वेच्छया गाधा याचन्ते पण्यमार्गगाः ॥ २ ॥

पृथ्वी—(सस्मितं) सम्यग्दर्शितं भवता। जुगुप्साजनको ह्येतेषां वेषविशेषः—

वेणीमूलनिबद्धवर्णकुसुमाः फालारुणस्थासकाः
क्षौरश्यामलपट्टिकाङ्कहनवश्शातोरसश्श्यामलाः।
चञ्चत्कङ्कणपाणितालयगास्त्रीविभ्रमाश्चर्वितैः
ताम्बूलैरसिताधरा विपणिगाष्षण्डास्ससीमन्तकाः ॥ ३ ॥

(इति परिक्रम्य) सखे, पश्य—

चूतपल्लववितानितोन्नत-
स्तम्भगुम्भिततत्ध्वजावलिः।
लम्बितप्रसवमालिकाञ्चिता
भाति राजसरणिर्जलोक्षिता ॥ ४ ॥

विदू—पश्यतु वयस्यः ब्राह्मणानां सम्भ्रमातिशयं—

केचिच्चर्चितभस्मपुण्ड्रनिटिलाश्चञ्चन्महाराङ्कवाः
केचिच्छुभ्रमृदूर्ध्वपुण्ड्रमधुरा बद्धाच्छकच्छाम्बराः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

केचिच्चन्दनकल्पितोर्ध्वतिलका आजानुकच्छा द्विजाः
संसद्योग्यनवाम्बराः फलकरा गच्छन्त्यहो संघशः ॥ ५ ॥

पृथ्वी—इतः पश्यतु वयस्यः (सस्मितं)—

राजानः कौतुकाविष्टास्सर्वाभरणभूषिताः ।
स्वयंवरकृते यान्ति स्यन्दनैरुज्वलाम्बराः ॥ ६ ॥

(इति परिक्रम्य) सखे पश्य स्वयंवरमण्डपवैभवं—

रम्भास्तम्भनिगुम्भितस्रगभितो नानावितानाञ्चितः
प्रोत्सर्पत्सितधूपधूमपटलो हृद्योद्यदातोद्यभाक् ।
आसीनैर्मृदुलासनेषु बहुधा भूवल्लभैर्मण्डितः
योषाभूषणघृष्टिवृष्टिसुभगो विभ्राजते मण्डपः ॥ ७ ॥

तदावामपि ब्राह्मणसंघमनुप्रविशावः ।

(निष्क्रान्तौ)

(शुद्धविष्कम्भः)

(ततः प्रविशति प्रतिष्ठित पृथ्वीराजप्रतिमे प्रतीहारे स्थितस्सभास-
मुचितवेषस्सर्वाधिकारी पुरुषः)

पुरुषः—(संघशः प्रवेष्टुकामान्पौरानवलोक्य)—

राजानः प्रविशन्ति हन्त कुतुकादत्र क्रमात्तज्जनाः
द्वारेणान्यतमेन यान्तु नितरां पंक्तिक्रमान्मन्धराः ।
अन्तः कोपि सभाविरुद्धचरितो मास्तु स्वकीयासने
निश्शब्दं समुपाविशत्वविचलं नान्तः प्रवेशश्शिशोः ॥८॥

(नागरिकश्यालमवलोक्य) ब्राह्मणांस्तेन पथा प्रवेशय ।

(श्यालः—तथा करोति) ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विदू—(प्रतिमामवलोक्य जनान्तिकं) सखे, हन्त द्वारे भवत्प्रतिमा।

पृथ्वी—आम, जयचन्द्रस्य शाठ्यकार्यमेतत्।

विदू—इयं प्रतिमा तावन्ममापि सन्देहमुपजनयति। अहं त्वालपितुकाम इव।

पृथ्वी—सत्यमभिहितं, शिल्पिना कृतहस्तेन भवितव्यं—

अहममि तथैव जान-
न्किमिदं स्थितोस्मि तद्द्वारे।
इति लज्जितचित्तस्स-
न्क्षणमात्रं स्थितोस्मि दिग्भ्रान्तः ॥ ९ ॥

विदू—(कर्णे) एवमिव।

पृथ्वी—तथैव।

विदू—तर्हि, कथमहं।

पृथ्वी—

निर्दिष्टदेशगतमद्भुतवेगरथ्यं
सैन्यावृतं रथवरं विविधायुधाढ्यम्।
आरुह्य पालय मदागमनं सखे त्वं
यावत्तया प्रतिनिवृत्य भवेयमारात् ॥ १० ॥

विदू—किं मया तत्रतावदेकेनैव स्थातव्यं?

पृथ्वी—भीत इव।

विदू—किं, भीतिर्नाम। न जानासि मां वसन्तकं, अत्रत्यैः प्रत्यभिज्ञातो भवेयमिति।

पृथ्वी—भवतु नाम, किं तेन?

विदू—नहि तथा, भवता समं प्रचलन्निहैवास्मि।

पृथ्वी—तर्हि सम्मर्दे तावत्क्षिप्रकारिणा भवता भवितव्यं।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विदू—अलं चिन्तया, तटित्कल्पो भवेयं।

पृथ्वी—तर्हि, प्रविशामस्तावदभ्यन्तरं (तथा कृत्वा ब्राह्मणगोष्ठीमनुप्रविशति)

विदू—(परितो विलोक्य) हन्त, सर्वेषामपि राज्ञां तत्रैव दृष्टिः। यत्र प्रविशति सा मृगाक्षी।

पृथ्वी—(सस्मितं) आम—

स्वस्वातिवैभवविदर्शनबद्धचित्ताः
स्वस्वाभिजात्यगुणरूपविकासनोत्काः।
चेष्टाविशेषपरिदर्शितहार्दभावाः
क्षोणीभुजो विजयमात्मनि कामयन्ते ॥ ११ ॥

(ततः प्रविशति करग्रहीतकुसुममाला संयुक्ता काञ्चनमालाद्वितीया)

संयुक्ता—(संस्कृतमाश्रित्य जनान्तिकं) काञ्चनमाले, अपि नाम सन्निहितः पिता ?

काञ्च—आअच्छइ त्रिअ। (आगच्छतीव)।

राजानः—(परस्परं जनान्तिकं)—

नयनसुधा सन्निहिता
चञ्चच्छफरीनिभाक्षिसुभगेयम्।
मन्मथजननी कान्ता
कान्त्या सिञ्चति विलोचनानि नः ॥ १२ ॥

प्रविश्य **जयचन्द्रः**—(सगम्भीरं) वत्से, परितः पश्य—

नानादेशसमागता विभवतो वैविध्यमुच्चावचं
प्राप्ता भाषितवेषभेदविविधा आचारभिन्ना नृपाः।
उद्वोढुं भवतीं कुतूहलसमाक्रान्ता निषीदन्त्यमू-
न्दृष्ट्वा चित्तहरं वरं वृणु मुदां मां पात्रमाधत्स्व च ॥ १३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

संयुक्ता—(मन्दं परिक्रम्य जनान्तिकं) काञ्चनमाले, पश्य तावदप्यागतस्तापसवेषधार्यार्यपुत्रः ?

काञ्च—(परितो विलोक्य जनान्तिकं) अहइं पेङ्ख बह्मणसंघम्मि (अथकिं पश्य ब्राह्मणसंघे)।

संयुक्ता—(अपाङ्गेन विलोक्य संज्ञां करोति)।

पृथ्वी—(जनान्तिकं) सखे, अप्यवलोकितं—

अपाङ्गवीक्षाकृतसंज्ञया मां
सज्जो भवेतीयमनल्परागा।
भ्रूचालनेन प्रतिबोधयन्ती
कातर्यमास्ये प्रकटीचकार ॥ १४ ॥

विदू—(जनान्तिकं) पश्यतु वयस्यः, सर्वेषां राज्ञां मुखविकारविशेषं—

यथा यथा गच्छति पङ्कजाक्षी
पुरस्तथा पृष्ठगभूपपंक्तिः।
निर्वेदवैवर्ण्यमहो मुखे स्वे
प्रकाशयत्यानतकन्धरा सा ॥ १५ ॥

पृथ्वी—पश्यतु वयस्यः, मन्दाक्षमन्दगतिस्सा मन्दमितः पश्यन्ती प्रतीहारोपकण्ठं सोत्कण्ठं प्रयातीव।

विदू—प्रस्थितो भव प्रकृतकार्यकरणाय।

पृथ्वी—भवानप्यनुयातु मत्स्यन्दनसकाशं (उत्तिष्ठति)।

विदू—(उत्थाय) त्वरयतीव सा भवन्तं।

पृथ्वी—आम—

भावगर्भितनिजाक्षियुग्मम-
प्यत्र सम्प्रति मयि प्रचोद्य सा।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पाणिपद्मविधृतस्रगुज्वला
द्वारदेशमुपयाति मन्धरा ॥ १६ ॥

(इति निष्क्रान्तः)।

विदू—(स्वगतं) गोपुरे तावत्किं वा प्रचलिष्यतीति निरीक्षे (निष्क्रान्तः)।

संयुक्ता—(मालापाणिर्द्वारदेशं गच्छति)।

राजानः—किन्नु खल्वेवं।

जयचन्द्रः—(विलोक्य स्वगतं)—

वेलामुल्लंघ्य यातीयं राजाब्ध्यूर्मिपरम्पराम्।
शफरीव स्वनाशाय तदौद्धत्यन्तु नोत्सहे ॥ १७ ॥

(इति सोद्धतं परिक्रामति)।

संयुक्ता—(सहसोपसृत्य पृथ्वीराजप्रतिमाकन्धरायां मालामर्पयति)।

(सभायां—कलकलः)

जयचन्द्रः—(सरभसमुपसृत्य सदन्तपीडं संयुक्ताया बाहुं गृह्णाति)।

(सरभसं) (राजसमुचितवेषः पृथ्वीराजः समुपसृत्य दक्षिणपाणिना संयुक्तायाः पाणिं गृहीत्वा वामपाणिना सुदृढं मणिबन्धे जयचन्द्रं गृहीत्वा च भ्रूचालनेन प्रतिमां प्रदर्श्य) किन्नु खल्विदं?

विदू—(सरभसं प्रविश्य) भवदनागमनमवलोक्य प्रतिमारूपेण कारितः कारुणा।

जयचन्द्रः—(अवनतमुखस्तूष्णीं तिष्ठति)।

राजानः—(स्तम्भीभूय तिष्ठन्ति)।

विदू—सखे—

म्लेच्छाद्विमोच्य निहितो निजराजधान्या-
मित्येवमेष सुविचार्य कृतज्ञतां ताम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सन्दर्शयन्ननु भवत्प्रतिमां सभाया
द्वारे न्यवेशयदहो वरणाय पुत्र्याः ॥ १८ ॥

पृथ्वी—(सदन्तपीडं) वेतसस्य तावदन्तेवासीव।

विदू—अथकिं, अथकिं, अयं तावत्—

कापट्यपाटवविपाटनलब्धदौस्थ्यो-
प्यानायकुक्षिपतितोद्धतसिह्मकल्पः।
नैव प्रकाशयति ते पुरतस्स्वचेष्टां
शालीनतान्तु मुखतः प्रकटीकरोति ॥ १९ ॥

तद्भवन्तंद्वारे स्थापितवन्तमेनं तु स्थापय तावत्कारागाराभ्यन्तरे।

(संयुक्ता—सावेगं पृथ्वीराजं पश्यति)

सचिवः—(सरभसमुपसृत्य)—

शाठ्यशाखिकुठारत्वमापन्ने त्वयि मत्प्रभुः।
मैत्रीमपेक्षते स्वीयपुत्रिकादानतः प्रभो ॥ २० ॥

जयचन्द्रः—(साञ्जलिबन्धं) प्रभो—

कन्यापितास्मि कन्येयं त्वान्तु कामयते चिरात्।
प्रदत्तां तन्मया पुत्रीं स्वीकृत्याप्नुहि सम्मदम् ॥ २१ ॥

विदूषकः—(सहस्ततालं) अहो, संयुक्तोसि संयुक्तया।

(संयुक्ता—स्मयते)

जयचन्द्रः—किं ते भूयः प्रियमुपहरामि।

पृथ्वीराजः—

शाठ्यं विमुच्य ननु लब्धवता सुहृत्वं
दत्ता मयाभिलषिता भवतैव कन्या।
मैत्रीविवर्धितपरस्परबन्धुभावो
हृष्टोस्मि सम्प्रति किमन्यदितः प्रियं नः ॥ २२ ॥

तथापीदमस्तु (भरतवाक्यं)।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक्पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैस्सम्भृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः॥२३॥

(निष्क्रान्तास्सर्वे)

॥ इति पञ्चमोऽङ्कः ॥

॥ इति बालधन्विजग्गूवकुलभूषणमहाकवि विरचिता
संयुक्ता सम्पूर्णा ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

॥ श्रीः ॥

॥ शुभमस्तु ॥

निघ्नतापसम्

प्रथमोऽङ्कः

बृन्दाकान्तारसञ्चारी नन्दानन्ददकेसरी ।
बृन्दारकारिसंहारी मन्दारी पातु मां हरिः ॥ १ ॥

नान्द्यन्ते प्रविश्य सूत्रधारः—एवमार्यमिश्रान्विज्ञापयामि—

नानानाटकनिर्माता यः कोविदमुदावहः ।
स एवास्यापि कर्ता हि जग्गू वकुलभूषणः ॥ २ ॥

(नेपथ्ये)

वत्स—

नभोमध्यं दीप्तो रविरपि समायाति तदहं
व्रजामि द्राग्माध्यंदिननियमसम्पादनकृते ।
तदत्रैवास्व त्वं वितर हरिणेभ्यो नवतृणं
समिद्दानैरग्निं प्रकटितशिखं साधु रचय ॥ ३ ॥

सूत्रधारः—(आकर्ण्य) हन्त, मध्यंदिनमपि सन्निहितमेव। तदिदानीं विभण्डको नाम तपोधनः निजपुत्रमृष्यशृङ्गमेवमादिशति। तदहमपि यास्यामि तावत् (निष्क्रान्तः)।

(प्रस्तावना)

(ततः प्रविशति सहपुत्रेण विभण्डकः)

विभण्डकः—वत्स,

इहैव माध्यन्दिनकर्म कुर्व-
न्कमण्डलुस्थोदकतः पवित्रः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

विलोकयात्र स्थितगोसमूहं
घासोदकादिप्रतिपादनेन ॥ ४ ॥

अहं तावत्सरसि निर्वर्तितमाध्यन्दिनकर्मा प्रतिनिवर्तिष्ये, (निष्क्रान्तः)

ऋष्यशृङ्गः—(पानीयं गवां पुरतो निधाय कस्याश्चिद्गोः कण्ठमाश्लिष्य)—

ननु पिब सलिलं मया वितीर्णं
तृणमपि ते वितरामि साम्प्रतं तत् ।
नहि किमु तव पातुमेतदिच्छा
तृणमपि वा चर दत्तमेतदग्रे ॥ ५ ॥

(तृणं प्रकीर्य) सत्वरं खाद, यावदागमिष्यन्ति मत्तातपादाः। अन्यथा कुप्येयुः (इति तन्मुखमुन्नमय्य प्रचुम्ब्य च) किमभिलषितो यवागूरसः? अस्तु नाम। आयास्यन्ति मत्तातपादाः। करिष्यन्ति च नीवारपाकक्रियां। दास्यामि तावदनन्तरं। अद्य तावत्खाद तृणं। कर्तव्यमितोपि बहु वर्तते मे, कर्तव्यस्तुलसीकुसुमापचयः सन्धुक्षणीयस्सवनपावकः।

(नेपथ्ये गाननादः)

ऋष्यशृङ्गः—(आकर्ण्य) किन्नु खल्विदं। अश्रुतपूर्वोयं नादः—

समाकुञ्चितकर्णोयं मृगयूथस्ततेक्षणः।
शृणोति वलितग्रीवो यतो नादः प्रवर्तते ॥ ६ ॥

हुं, अयमप्याम्नायघोषस्स्यात् (विचिन्त्य पुनरप्याकर्ण्य) किन्नु खलु, न श्रुतपूर्वोयमीदृशो वेदघोषः। अतीव रमणीयोयं, (इति नेपथ्याभिमुखमवलोक्य) हन्त, केप्यभ्यागताः तपोधनास्समायान्तीव (निर्वर्ण्य) किन्नु खलु अतिथयो मदुटजं समागच्छेयुरिव।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(ततः प्रविशन्ति स्पृहणीयाभरणा गणिकाः)

एका—हला, पश्य, अयं तावन्मुनिकुमारः—

कृष्णाजिनकौपीनः
श्मश्रुकलामनोज्ञमुखचन्द्रः।
स्थपुटितमांसलबाहुः
पीनोरा भाति मार इव ॥७॥

अपरा—आम, मुनिकुमारोपि स्पृहणीयरूपः—

यौवनव्यतिकरेण राजते
मानिनीहृदयहारिरूपभाक्।
अस्मदीयहृदयानि साम्प्रतं
पश्यतोहर इवाचरन्नयम् ॥८॥

अन्या—हन्त, कथमयं वशीकर्तुं शक्यते—

तपसा परिशुद्धचित्तवृत्तिः
रवितेजा विषये पराङ्मुखोयम्।
निरुपद्रवकन्दमूलभोक्ता
गतकापटयमनास्स्मरानभिज्ञः ॥९॥

एका—अपिनाम शपेदिति भीतिरपि मे।

अपरा—किं कुर्मः, बलवती खलु राजाज्ञा।

ऋश्यशृङ्गः—किन्तु खलु, सुदूरे तिष्ठन्ति (साञ्जलिबन्धं) आगच्छन्तु भवन्तो मदुटजं। इह खलु महानातपः—

नभोमध्ये भास्वान्परितपति तीक्ष्णैर्निजकरैः
तरूणां छायासु स्वपिति मृगयूथश्शिशुयुतः।
खगा लीयन्ते स्म प्रचुरदलमध्ये क्षितिरुहां
समन्ताज्झिल्लीनां प्रसरति रवः कर्णविवरम् ॥१०॥

तदागच्छन्तूटजाभ्यन्तरं।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सर्वाः—(मन्दमुपसृत्य सभयं) क्व ते तातपादाः ?

ऋष्यशृङ्गः—माध्यन्दिनकर्मणे सरसीं प्रयाताः। अलं विचारेण। अहमस्मि अर्घ्यपाद्यार्पणाय (इत्युटजाभ्यन्तरं गन्तुमुद्युङ्क्ते)।

सर्वाः—(सस्मितं) मास्तु मास्तु। वयं तावद्वृक्षप्रच्छायमधितिष्ठामः (इति प्रच्छायं प्रविश्य) उपविशतु भवानप्यस्मिन् शिलातले। वयमप्युपविशामः (सर्वा उपविशन्ति)।

ऋष्यशृङ्गः—(उपविश्य) अपि नामाभिवर्धते युष्माकं तपः ? भवद्दर्शनाद्धन्योस्मि। किञ्चित्प्रष्टव्यमत्र वर्तते।

सर्वाः—निश्शङ्कं पृच्छतु भवान्।

ऋष्यशृङ्गः—युष्माभिः कीदृगनुष्ठीयते तपः ? कुत्र युष्माकं तपोवनं, भवतां वेषभाषादिकमन्यादृशं, न कदापि दृष्टपूर्वमीदृशं—

जटा कीदृक्सेयं भुजगवरभोगातिमसृणा
जटाजूटे शम्भोर्विधुरिव सुमस्रक्किरसि च।
फलद्वन्द्वं वक्षस्स्वपि पृथुलमाविष्कृतमहो
मृदुस्निग्धस्फीतं वपुषि विधृतं चीरवसनम् ॥ ११ ॥

किञ्च—

फाले लुठन्ति मृदुलासितकेशभङ्गाः
गण्डे न लोमशकलोप्यतिमार्दवाढ्ये।
कीदृक्च कण्ठतललम्बितदीप्रमाला
जतुं करे क्वणति का वलयालिरेषा ॥ १२ ॥

किञ्च—

युष्माभिरधुना प्रोक्तो वेदघोषश्च कीदृशः।
अभ्यस्तः कुत्र वा हन्त न कदापि श्रुतो मया ॥ १३ ॥

सर्वाः—क्रमशश्शृणोतु भवान्।

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ऋष्यशृङ्गः—अवहितोस्मि, उपदिशन्तु तपसः क्रमं।

सर्वाः—(सस्मितं) वयं तावत्तपसा प्रत्यक्षीकृतमन्मथाः।

ऋष्यशृङ्गः—हन्त, प्रत्यक्षीकृतः मन्मथः?

सर्वाः—अथकिं?

ऋष्यशृङ्गः—स कथं वर्तते मन्मथः।

एका—सत्वनङ्गः, न दृष्टिगोचरः।

ऋष्यशृङ्गः—तर्हि, कथं प्रत्यक्षीकृतः।

अपरा—सतु मनोभवः।

ऋष्यशृङ्गः—किन्नु खलु, मनसि जायते?

अन्या—अथकिं?

ऋष्यशृङ्गः—सतु किं ददाति?

एका—स्वर्गसुखं।

ऋष्यशृङ्गः—किन्नु खलु, स्वर्गसुखं? कथं वर्तते तत्सुखं?

अपरा—वाचा वर्णयितुं न शक्यते। स्पृशतु भवानिमां जटां।
(इति वेणीं स्पर्शयति)

ऋष्यशृङ्गः—(सानन्दं) हन्त—

मृदुलतरा स्पृहणीया-
(आघ्राय) परिमलबहुला सुशीतलाच।
रोमाञ्चयति शरीरं
स्पर्शोयं हन्त कीदृशं शर्म॥ १४॥

अन्या—अयं तावत्कन्दविशेषः। खादतु भवान् (इति मोदकं ददाति)।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ऋष्यशृङ्गः—(भुक्त्वा सहर्षस्मितं)—

वनेस्मिन्नीदृशः कन्दः न प्ररोहति जन्म धिक् ।
न दृष्टो नैव भुक्तश्च कुत्र वा लभ्यते कथम् ॥ १५ ॥

अपरा—अस्मत्तपोवने प्ररोहति ।

ऋष्यशृङ्गः—एतद्भक्षणेन प्रत्यक्षीभवेन्मन्मथः ।

एका—एतावता नालं, तपसां पन्थानो बहवस्सन्ति ।

ऋष्यशृङ्गः—कथं, बहवस्सन्ति । उपदिशतु भवान्कृपया । कृतार्थो भवेयं ।

सा—(निजकपोलं स्पर्शयति) ।

ऋष्यशृङ्गः—(सनेत्रमीलनं प्रकाशयन्नानन्दं)—

क्वाहं कोहमिति ज्ञातुं न शक्नोमि तपोबलात् ।
आनन्दसिन्धुमग्नात्मा किं करोति कथं वदेत् ॥ १६ ॥

अपरा—अभ्यागतोहमाश्लिष्य तोषयितव्यः खलु ।

ऋष्यशृङ्गः—अथकिमथकिं, सत्यं तोषयितव्य एव (आलिङ्ग्य)—

जडीभूतशरीरोस्मि सुखस्पर्शातिशायितः ।
अमृतह्रदमग्नात्मा गगने प्लावितोस्म्यहम् ॥ १७ ॥

अन्या—इतोपि सुखातिशयो वर्ततेऽस्मत्तपोवने ।

ऋष्यशृङ्गः—कथं, हन्त, इतोपि सुखातिशयः, न, न (विचिन्त्य) श्रोतुमिच्छामि वेदघोषं । श्रावयन्तु नाम ।

(सर्वाः—गायन्ति)

ऋष्यशृङ्गः—

उल्लासयति वेदोयं मानसश्रमनोदनः ।
स्वरविन्यासवैदग्ध्यं सुधावर्षिच कर्णयोः ॥ १८ ॥

अस्मत्तातपादैरपि न परिचितोयं वेदः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अपरा—अस्मत्तपोवने तावदेतत्परिचयः क्रियते।

अन्या—एतत्फलद्वयं दित्सामि, समायातु भवानस्मत्तपोवनं।

(नेपथ्ये)

भोः वत्स, ऋष्यशृङ्ग, क्वासि ?

ऋष्यशृङ्गः—अस्मत्तातपादा आगताः।

(सर्वाः—सभयं निष्क्रान्ताः)

ऋष्यशृङ्गः—कथं गता एवातिथयः। भवतु, अस्मत्तातपादेभ्यो निवेदयामि, अयमहमायातः।

(निष्क्रान्तः)

॥ इति प्रथमोऽङ्कः ॥

द्वितीयोऽङ्कः

(ततः प्रविशति विभण्डकः)

विभण्डकः—किन्नु खल्वेवं—

उषस्येवाहं द्राग्गलिततमसि प्राप्य सरसीं
कृतस्नानश्शुद्धो मदुटजमगां हन्त तनुजः।
अयं निद्राहीनोप्यजिनशयने पातिततनुः
कुतो बालस्येनाप्रकटितनिजाशस्स्वपिति च ॥ १ ॥

पूर्वेद्युर्मध्यन्दिनादारभ्य संवृत्तोयमन्यद्वव—

निमीलितार्धारुणलोचनोयं
चिन्ताभरत्यक्तसमस्तकार्यः।
स्वयं किमप्यात्मनि सल्लपन्सन्
मुहुर्मुहुर्निश्श्वसिति स्म मन्दः ॥ २ ॥

स्यादनुल्लाघता, भवतु पृच्छामस्तावत्, वत्स भोः, इतस्तावत्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

साङ्गभङ्गं प्रविश्य ऋष्यशृङ्गः—अयमहमस्मि।

विभण्डकः—किमनुल्लाघता।

ऋष्यशृङ्गः—नहि नहि।

विभण्डकः—किं निमित्तमेवमसि?

ऋष्यशृङ्गः—नान्यत्किमपि, पूर्वेद्युः केचनातिथयः तपोधनाः संप्राप्ताः।

विभण्डकः—ततः किं?

ऋष्यशृङ्गः—तेत्वनङ्गीकृतास्मदातिथ्या एव निर्गता इति। भगवन् तेतु विलक्षणरूपाः, अस्मदादिवन्नासन्।

विभण्डकः—तर्हि, कथमासन्।

ऋष्यशृङ्गः—न मया वर्णयितुं शक्यते। तेषां जटाः भोगिभोगनिभाः।

विभण्डकः—किमेवं प्रलपसि?

ऋष्यशृङ्गः—आम, सत्यं मया करेण गृहीताः। आहा, तासां मार्दवं, सौगन्ध्यं, शीतलता, स्नैग्ध्यं, किं ब्रवीमि, न मया दृष्टपूर्वाः। तत्र केचित्तु परिमलहृदयङ्गमाभिः मल्लीमालतीमालाभिरावेष्टितधम्मिल्लाः।

विभण्डकः—किन्नु खल्विदं। एवमपि सन्ति वा तपोधनाः।

ऋष्यशृङ्गः—सन्ति, मया साक्षादवलोकिताः, अन्यच्च तैः प्रतिवक्षः फलद्वयमानीतं, पृथुलतरं तत्।

विभण्डकः—(सस्मितं) तर्हि, तास्तु योषितः स्युः।

ऋष्यशृङ्गः—योषिन्नाम।

विभण्डकः—(स्वगतं)—

स्त्रीपुल्लिङ्गव्यत्ययं नैव वत्सः
जानात्यस्मत्पर्णशालान्तरस्थः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तारुण्याढ्योप्यात्तमाराप्रवेशः
स्वाध्यायैकासक्तचित्तोस्ति हन्त ॥ ३ ॥

(प्रकाशं) वत्स, तास्तु योषितः, न तपोधनाः। भवन्तं वञ्चयितुमागतास्स्युः। किमुधृतं चीरवसनं।

ऋष्यशृङ्गः—चीरमचीरंवा न जाने, मृदुलमृदुलानि सुखस्पर्शानि स्निग्धतराणि, अवर्णनीयवर्णरमणीयानि तैर्विधृतानि वसनानि।

विभण्डकः—किमु ते धृतकूर्चाः?

ऋष्यशृङ्गः—नहि नहि किं कथयेयं। तेषां कपोलाः मृदुलस्निग्धाः लावण्यस्पृहणीयाः मत्करेण स्पर्शिताः। तेषां कोमलतरेषु कपोलेषु मग्ना मदङ्गुल्यः।

विभण्डकः—(सस्मितं) किमप्यूचुस्ते।

ऋष्यशृङ्गः—अथकिं, अस्त्यस्माकं तपोवनमन्यत्, तत्रेतोपि सुखविशेषो वर्तते इति। अन्यदपि विस्मयावहं।

विभण्डकः—किं तत्।

ऋष्यशृङ्गः—तेतु तपसा प्रत्यक्षीकृतमन्मथाः। भवतोपि प्रत्यक्षीकारयिष्यामः आयाहि तावदस्मत्तपोवनं इत्यूचुः।

विभण्डकः—(स्वगतं) किमर्थमेवमाचरितं ताभिरस्मत्तपोवने।

ऋष्यशृङ्गः—किन्नु खलु, चिन्ताकुला इव तातपादाः ते गता इति वा। तत्र गत्वानेष्यामि। यत्र ते वर्तन्ते तान्पुनरप्यालिङ्ग्य सन्तोषयिष्यामि।

विभण्डकः—(सावेगं) किन्नु, ताभिरालिङ्गितोसि।

ऋष्यशृङ्गः—आम, आलिङ्गनं तावदतिथिसत्कार इत्युक्तं—

विभण्डकः—(सप्रणिधानं) क्षणमिव स्थित्वा स्वगतं) आं ज्ञातं—

अवग्रहनिरासार्थं रोमपादस्य चेष्टितम्।
अयं प्रयातु नामाद्य पर्जन्यो वर्षतु स्वयम् ॥ ४ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ऋष्यशृङ्गः—अलं चिन्तया, तानानेष्यामि।

विभण्डकः—तथास्तु—

अपरिचितपथेन त्वं प्रयास्यद्य वत्स-
स्थपुटितवनवर्त्मा ते तु कुत्र प्रयाताः।
न किमपि विदितं ते मार्गणं वा कथं स्या-
दिति मनसि विचार्य प्रेषयेयं कथं वा ॥५॥

ऋष्यशृङ्गः—अलं विचारेण, विदिततद्वर्त्मास्मि। कथमपि गत्वा तानानयेयं (इति प्रणमति)।

विभण्डकः—शुभं भूयात् (इति तमुत्थाप्य शिरस्याघ्राय) याहि वत्स, कल्याणावाप्तये।

ऋष्यशृङ्गः—(परिक्रम्य)—

इतो यातास्ते मां प्रतिपदमवेक्ष्यैव मुनयः
तरुच्छायारम्ये पथि कृतपदाः मन्दगमनाः।
इतस्तेषां गन्धः प्रसरति मुहुर्मन्दमरुता
सुदूरादभ्येति श्रुतिसुभगनादोपि विपिने ॥६॥

तदनेन पथा यास्यामि तावत्, (इति परिक्रम्य) कथं, सन्निहित इव तेषां व्याहारः (इति नेपथ्याभिमुखमवलोक्य)। हन्त, अनतिदूरे सरोवरतीरे निषीदन्ति सर्वे। तदुपसर्पामि (इति कतिचित्पदानि गत्वा) हन्त—

केचिदङ्घ्रियुगलं सरोवरे
संप्रसार्य करतस्सरोजलम्।
विप्रकीर्य च परस्परं मुदा
क्रीडनैकनिरता हसन्ति हि ॥७॥

(इति परिक्रामति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(ततः प्रविशन्ति यथानिर्दिष्टा गणिकाः)

एका—कथं पुनरपि द्रष्टव्यस्सकुमारः ?

अपरा—निरीक्षामहे, कन्दमूलफलसम्पादनाय समागच्छेदपि।

अन्या—एवं कियन्तं कालं स्थातव्यमस्माभिः।

एका—अस्मिन्महारण्ये स्थातुं महती भीतिर्मे।

अपरा—(सहासं) स पुनः कुमारः स्त्रीपुल्लिङ्गव्यत्यासमपि न जानाति।

अन्या—पशुकल्पः।

एका—(सस्मितं) न हि तथापि। सतु पशुर्जानाति व्यत्यासं। कुमारस्तु तदपि न।

अपरा—(सानुतापं) पित्रा तावदेवं वर्धितः।

अन्या—स्यान्नम तपोवनवासः, नैव तारुण्यकार्यं, महदिदमाश्चर्यं।

अपरा—(सहासं) तत्प्रतिबोधकसामग्र्यभावात्प्रसुप्तमिति तर्कयामि।

अन्या—तत्सत्यं ?

ऋष्यशृङ्गः—(दूरान्निर्वर्ण्य) एते तावत्पूर्वेद्युरागताः, त एव—

एते हन्त जलाशये विरचितस्नानक्रियास्साम्प्रतं
स्वच्छस्निग्धसुवल्कलोदरचलद्वक्षःफलास्सस्मिताः।
उद्धूतासितदीर्घजिह्मसुजटाः फालोज्वलस्थासकाः
ग्रीवाश्चञ्जपनिस्तलोज्वलसरा दृग्गोचरा भाग्यतः ॥८॥

अयमहमागतोस्मि (इत्युपसर्पति)

सर्वाः—(ससम्भ्रममुत्थाय सस्मितं) अयं तावत् स्तोकं शिक्षित इव मन्मथेन।

ऋष्यशृङ्गः—सत्करोमि तावदेकवारमतिथीनाश्लिष्य।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सर्वाः—(सस्मितं) तथास्तु महान्प्रमोदः (इति क्रमश आलिङ्गन्ति)।

एका—(निष्पीडितवक्षोजमालिङ्गति)

ऋष्यशृङ्गः—(सानन्दं) मैवं दृढतरमालिङ्ग। फलद्वयं निष्पिष्टं भवति।

सा—(सहासं) नेदं फलद्वयं, न वयं तपोधनाः। अपितु नार्यः—

न प्ररोहति नारीणां श्मश्रुकूर्चादिकं हनौ।
यौवने स्थूलतां यातस्स्तनावेतौ नितम्बकः ॥ ९ ॥

ऋष्यशृङ्गः—कथं, एतौ स्तनौ, तर्हि, तारुण्ये तावन्नास्माकं स्तनौ कुतः स्थूलतां यातः ?

अन्या—नारीणामेव। न तु पुंसां।

ऋष्यशृङ्गः—तर्हि, किमहं पुमान् ?

अपरा—आम, अनुभूतनारीसङ्गसुखविशेषः पुमांस्तु तां त्यक्तुं नैवोत्सहते।

ऋष्यशृङ्गः—आम, सत्यं। अत एव युष्मद्विरहेणाननुभूतपूर्वः कोपि विकारस्समुत्पन्नो मे। स्यान्नाम, कुत्र युष्माकं तपोवनं।

अपरा—नास्माकमावासस्थानं तपोवनं। अपितु नगरी।

ऋष्यशृङ्गः—कथं, नगरी, नैव श्रुतपूर्वा, कथं वर्तते ?

अन्या—नगरी तावत्—

उच्चसौधसमाकीर्णा नानालङ्कारभूषिता।
गजवाजिसमृद्धा च तुष्टपुष्टप्रजाकुला ॥ १० ॥

ऋष्यशृङ्गः—एवं तर्हि, ममापि दिदृक्षा बलवती।

अपरा—तर्हि, अधिरोहतु भवान्रथममुं। (इति दर्शयति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ऋष्यशृङ्गः—किमयमेव रथः, आश्रमे तावत्कदापि पितृमुखाच्छ्रुतः रथो रथ इति। (सवैलक्ष्यं)—

दर्शनीयाद्भुताकारस्सन्निवेशेन मण्डपः।

(करेण परामृश्य) कीदृशोयं दारुविशेषः पीताभः।

एका—सुवर्णमयसर्वाङ्गो नैव दारुमयो ह्ययम् ॥ ११ ॥

ऋष्यशृङ्गः—सुवर्णं नाम।

अपरा—तत्तावद्बहुमूल्यं वर्तते धनिनां सन्निधौ।

ऋष्यशृङ्गः—हन्त! स्वप्नेपि मया तावन्नावलोकितं। (अश्वानवलोक्य) इमास्तावत्कीदृश्यो गावः, नास्मदुटजपरिसरे तावदीदृश्यः।

अन्या—नेमा गावः, सिन्धुदेशसमुत्पन्नास्तुरङ्गमाः। रथमाकर्षन्ति।

ऋष्यशृङ्गः—किन्नु खलु, सिन्धुदेश इत्येको वर्तते, किमु।

अपरा—अथ किं?

ऋष्यशृङ्गः—अहं तावन्मन्ये, अस्मत्काननमिव सर्वत्र काननमिति। (अश्वान्वीक्ष्य)

एते समुज्वलसुचिक्कणमांसलाङ्गाः
कण्ठोर्ध्वदेशविलसद्बहुकेसराढ्याः।
एषां विषाणयुगलं न शफास्तु शीर्णाः
नो सन्ति हन्त पृथुला ननु वालभागाः ॥ १२ ॥

(इति सवैलक्ष्यं पश्यंस्तिष्ठति)

एका—आरोहतु नाम रथं।

(ऋष्यशृङ्गः रथमारुह्योपविशति। गणिकाः तदुभयपार्श्वयोरुपविशन्ति।)
(सूतः वाहान्प्रेरयति।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

ऋष्यशृङ्गः—हन्त, अवतराम्यहं, वेगोयं मां गिलतीव—

धावन्ति मामपि विहाय तु काननानि
मत्पृष्ठतोऽग्रगतपर्वत एष हन्त ।
आधाव्य मच्छिरसि सम्पततीति मन्ये
निश्वासरोधगलितस्थितिरस्म्यहं तु ॥ १३ ॥

एका—अपरिचिततया इदं प्रथमतया च तावदेवं (इत्यालिङ्गति)

ऋष्यशृङ्गः—ऊर्ध्वोच्छ्वासोप्यहं तेद्य समाश्लेषाद्गलद्भयः ।
रथेन वल्गितश्शश्वत्त्वत्कुचामर्दितोस्म्यहो ॥ १४ ॥

(परितो विलोक्य) हन्त,—

सरांसि बहुदूरतस्सविधमेत्य चक्रभ्रमं
विधाय च गतानि हि प्रचुरवेगतः पृष्ठतः ।
तरुव्रजनिगूहिताः कतिपये क्वचित्पक्वणाः
दृशोर्धुरि समागताः क्षणमिवाथ तेऽन्तर्हिताः ॥१५॥

सर्वाः—पश्यतु भवान्, महाराजनगरी सन्निहिता ।

ऋष्यशृङ्गः—कथं महाराजनगरी, कथं वर्तते ? (कण्ठमुद्यम्य पश्यति)

अन्या— मरुत्तरलिता मुहुर्ध्वजपटालिरुच्चोन्मुखा
समाह्वयति सादरं द्रुततरं भवन्तं पुरी ।
समुच्छ्रितगृहावलिश्शिखरकैतवान्मस्तका-
न्युदस्य भवदीक्षणे प्रकटयत्यहो कौतुकम् ॥ १६ ॥

एका—(नेपथ्याभिमुखमवलोक्य) किन्नु खल्विदं, चारमुखाद्विदितोदन्त इव महाराजः । सर्वविधपरिकरपरिवृतो नगरद्वारि तिष्ठति ।

(रथस्समुपसर्पति) (ततः प्रविशति यथा निर्दिष्टो महाराजः)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

महाराजः—(रथादवरुह्य कतिचित्पदान्यभ्युद्गम्य रथस्थमृष्यशृङ्गं पादे गृहीत्वा)—

धन्योस्म्यनुगृहीतोस्मि सफलाद्य जनिर्मम ।
त्वदङ्घ्रिपद्मसंस्पर्शो यदभून्मे महापुरे ॥ १७ ॥

(इति तं रथादवतारयति । वादित्रघोषः प्रचलति)

ऋष्यशृङ्गः—(स्वगतं)—

न कदापि दृष्टपूर्वं
दृश्यं पश्यामि साम्प्रतं हन्त ।
स्वप्नोद्भवमिव नाना
विचित्ररूपं सदानुभाव्यं च ॥ १८ ॥

(सर्वे परिक्रम्य पुरप्रवेशं नाटयन्ति)

महाराजः—(ऊर्ध्वमवलोक्य सानन्दं)

आकाशे परितो विजृम्भिततनुर्मेघो घनध्वानतः
सर्वानप्यभिनन्दयंश्च निबिडध्वान्तावृताशामुखः ।
अस्माकं परिपूरयंश्चिरधृता आशाश्च दिष्ट्याधुना
श्रीमत्तापसपुङ्गवाङ्घ्रिकमलस्पर्शात्समुज्जृम्भते ॥ १९ ॥

(इति परिक्रम्य) भगवन्, अयमेव दासस्य प्रासादः ।

ऋष्यशृङ्गः—(स्वगतं) कथं प्रासादः—

खर्वो ममोटजः क्वायं प्रासादः प्रांशुरुज्वलः ।
क्वचैतयोर्द्वयोस्साम्यं मेरुसर्षपयोरिव ॥ २० ॥

(ऊर्ध्वमवलोक्य) हन्त, किन्नु खल्विदं—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तटित्सदृशकाञ्चनध्वजपरम्पराभिस्स्वयं
कनत्कलशकोटिभिर्लिखति वारिवाहान्तरम् ।
गवाक्षचयलोचनोप्यररपक्ष्म विस्तार्य च
प्रजास्समवलोकयन्निव विभाति सौधो बत ॥ २१ ॥

राजा—सौधाभ्यन्तरं प्रविशतु भगवान् ।

ऋष्यशृङ्गः—तथा । (इति सर्वैरपि परिक्रम्य) किमिदं—

स्वप्नो नु माया नु मतिभ्रमो वा
तारामयो रत्नवरैरयं हि ।
नारीमुखैश्चन्द्रमयोपि हन्त
चित्राम्बराभो ननु सौध एषः ॥ २२ ॥

(प्रविश्य) सचिवः—महाराज, वर्षति पर्जन्यः—

धरणिमिमामवटयति
प्रसरत्पयोदजलधारा ।
सरिदिव सरणौ पूरः
प्रवहति सलिलस्य वेगगम्भीरः ॥ २३ ॥

राजा—महान्प्रमोदः, सर्वमिदं भगवतोस्य प्रसादप्रभावः । (इति ऋष्यशृङ्गेणावरोधं प्रविश्य) भगवन्, अवरोधोयं । अत्र निषीदतु भगवानस्मिन्विष्टरे, भवत्सपर्यायै समायास्यति मद्दुहिता (इति निष्क्रान्तः)

ऋष्यशृङ्गः—(पीठे समुपविश्य परितो विलोक्य च)—

अनवलोकितभोग्यफलान्यहो
कुसुमकोमलतल्पमिहाप्यहो ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मृदुलमासनमत्र सुचित्रितं
शुचिवितानसुमप्रचुरं गृहम् ॥ २४ ॥

(प्रविश्य शान्ता सविभ्रमं प्रणम्य तिष्ठति)

ऋष्यशृङ्गः—किमिदं ?—

त्रपां त्यक्त्वा वक्त्रं विनमितमिदं चन्द्रसदृशं
समुद्यम्यैनं मां सकृदपि समीक्ष्वस्व सुभगे ।
चलन्मीनाभं ते नयनयुगलं वीक्ष्य सुदृशः
त्यजाम्यायत्तस्सन्कठिनमिदमद्य व्रतमहम् ॥ २५ ॥

शान्ता—(सलज्जं) पित्रा तावदाज्ञप्तास्मि, सम्यगुपचरितव्यस्स भगवान्भवत्येति । तदिदानीं यदादिशति भगवान् सज्जास्मि तद्विधातुं—

स्नानार्थं सलिलं सुखोष्णमिह ते पात्रार्पितं वर्तते
स्वच्छस्निग्धमृदूत्तमं च वसनं वोढुं सुसज्जीकृतम् ।
नानाभक्ष्यफलादिकं च कनकस्फीतेर्पितं भाजने
स्वापार्थं परिकल्पितं च मृदुलं तल्पं यथा रोचते ॥२६॥

ऋष्यशृङ्गः—(स्वगतं) एतावत्कालपर्यन्तं वञ्चितोस्मि विधिना । यतस्सुखसामग्रीविशेषमीदृशमप्रदर्श्यैव कठोरे कान्तारे स्थापितोस्मि ।

(नेपथ्ये)

प्रतीची काष्ठापि प्रसरदरुणालक्तकरसा
द्विजास्सन्ध्यार्घ्यार्थं प्रमुदितहृदो यान्ति सरसीम् ।
समन्तादाकाशे सविरुति समुड्डीय विहगाः
तरून्यान्त्यावासानहमहमिकासङ्गसुभगाः ॥ २७ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(प्रविश्य) **राजा**—भगवन्, सायंसन्ध्या सन्निहिता। तदुत्तिष्ठतु भवान् सन्ध्योपासनाय। (इति प्रणमति)

ऋष्यशृङ्गः—हन्त, सायंसन्ध्याप्युपनता। (उत्थाय निष्क्रान्तः)

राजा—(परिक्रम्य) (शान्तया सह सभामण्डपमासाद्य) वत्से,

तपस्सिद्धो युवा विद्वान् रूपेणापि स्मरोपमः।
ऋष्यशृङ्गो यतस्तस्मात्तस्मै त्वां दातुमुत्सुकः॥ २८॥

त्वं तावत्कथं।

शान्ता—महान्प्रमोदः, धन्या भवेयं। तथास्तु।

राजा—कः कोत्र भोः?

सचिवः—(प्रविश्य) अयमहमस्मि।

राजा—रजन्यामस्यां शुभे मुहूर्ते तावदृष्यशृङ्गाय भगवते शान्तां दातुमिच्छामि। तत्सम्भारास्सम्भृयन्तां।

सचिवः—महान्प्रमोदः, तथास्तु। (निष्क्रान्तः)

राजा—वत्से, पाणिग्रहोचितालङ्कारालंकृता सज्जा भव तावत्।

शान्ता—तथा। (निष्क्रान्ता)

ऋष्यशृङ्गः—(प्रविश्य) निर्वर्तितं सन्ध्याकर्म—

भृत्यास्सविनयं प्रीत्या साधनानि च कर्मणः।
अर्पयन्ति समानीय नात्र क्लेशलवोपि हि॥ २९॥

राजा—(सविनयं) इदमासनं।

(ऋष्यशृङ्गः उपविशति)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा—(साञ्जलिबन्धं) भगवन्, अस्मद्दुहित्रा शान्तया गार्हस्थ्यमालम्ब्या-स्मत्कुलमुद्धर्तुमर्हसि भगवान्।

ऋष्यशृङ्गः—निघ्नोस्मि तापसोहं भवतः।

राजा—महान्प्रमोदः। वयमपि निघ्नतापसदर्शनेन धन्याः खलु। तत्प्रविशतु भगवान्विवाहमण्डपं।

ऋष्यशृङ्गः—तथास्तु।

राजा—किं ते भूयः प्रियमुपहरामि।

ऋष्यशृङ्गः—(सस्मितं)

दत्ता ते दुहिता मेद्य ववर्ष च वलाहकः।
जामाताप्यभवं राज्ञः किमितोप्यस्ति मे प्रियम् ॥ ३० ॥

तथापीदमस्तु। (भरतवाक्यं)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक्पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैस्सम्भृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः ॥

(निष्क्रान्तास्सर्वे)

॥ इति द्वितीयोङ्कः ॥

॥ इति बालधन्विजग्गूवकुलभूषणमहाकविविरचितं
निघ्नतापसं सम्पूर्णम् ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

जग्गूवकुलभूषणविरचिताग्रन्थाः

गद्यकाव्यम्

1 जयन्तिका (इयं बाणभट्टकृत-कादम्बरीसदृशी)
2 यदुवंशचरितं (हर्षचरित्रसदृशं)
3 उपाख्यानरत्नमञ्जूषा (क्षेमेन्द्रकृत-चारुचर्याव्याख्या)
4 भावकौमुदी

पद्यकाव्यम्

5 अद्भुतदूतं महाकाव्यम्
6 करुणरसतरङ्गिणी
7 पथिकोक्तिमाला
8 शृङ्गारलीलामृतम्
9 कलिकौतुकम् (कलिवर्णनम्)

चम्पूकाव्यम्

10 यतिराजचम्पूः
11 भारतसङ्ग्रहः
12 यात्रोदन्तचम्पूः
13 गीतराघवम्

नाटकानि

14 अद्भुतांशुकं (वेणीसंहारस्यपूर्वभागः)
15 प्रतिज्ञाकौटिल्यम् (मुद्राराक्षसस्यपूर्वभागः)
16 स्यामन्तकम्
17 मञ्जुलमञ्जीरं (रामायणम्)
18 बलिविजयम्
19 अमूल्यमाल्यम्
20 अप्रतिमप्रतिमम्
21 मणिहरणम् (भासकृतोरुभङ्गस्योत्तरभागः)
22 यौवराज्यं
23 प्रसन्नकाश्यपम् (अभिज्ञानशाकुन्तलोत्तरभागः)
24 संयुक्ता
25 वीरसौभद्रं (भासकृतदूतघटोत्कच-पूर्वभागः)
26 प्रतिज्ञाशान्तनवम्
27 नवजीमूतम्
28 अनङ्गदाग्रहसनम्
29 व्रतफलम्
30 कलिकालुष्यम्
31 दाशरथिदर्शनम्
32 वितीर्णामृतम्
33 निम्नतापसम्
34 मुग्धकुन्तलम्

स्तोत्राणि

35 हयवदनस्तोत्रम्
36 अमृताधिरोहिणी
37 लक्ष्मीदण्डकम्
38 लक्ष्मीस्तुतिमञ्जरी
39 यदुशैलेश शतकम्
40 दाशरथिसुप्रभातम्

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

41 वासुदेवसुप्रभातम्
42 भार्गवीसुप्रभातम्
43 श्रीनारसिंहसुप्रभातम्
44 लक्ष्मीजनार्दनसुप्रभातम्
45 सुब्रह्मण्यसुप्रभातम्
46 प्रपन्नवाणी
47 गान्धीनवरत्नमाला
48 वसन्तावतंसवर्णनम्
49 चरमोपायनिर्णयः
50 श्रीवचनभूषणं (संस्कृतश्लोकात्मकं-कर्णाटभाषातात्पर्यसहितं)
51 समस्यापूरणानि
52 चाटुश्लोकाश्च
53 अघविघातिनी
54 सुवर्णान्योक्तिपञ्चकम्
55 मध्यरङ्गनाथसुप्रभातम्
56 रङ्गनायिकासुप्रभातम्
57 मध्यरङ्गनाथस्तोत्रम्
58 रङ्गनाथाष्टोत्तरशतनामावलिः

कन्नडग्रन्थाः

59 मेलनाडिनभाग्योदय
60 राधामोहन्
61 अम्बरीषचरितम्
62 नगुविनगण्डु
63 रामजीरङ्गस्थलम्
64 भगवत्पद्यदशकम्
65 ವೇದಾಂತವೂ, ಸಾಹಿತ್ಯವೂ

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha